उच्चतरमाध्यमिकपाठ्यक्रमः

# संस्कृतम्

## ऐच्छिकम् -साहित्यम्

एकादशः वर्गः

HIGHER SECONDARY COURSE

# SANSKRIT

## OPTIONAL - SAHITHYA

XI

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala

2026

## राष्ट्रगीतम्

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य -विधाता
पंजाब-सिंधु-गुजरात-मराठा
द्राविड-उत्कल-बंगा
विंध्य -हिमाचल-यमुना-गंगा
उच्छल-जलधि -तरंगा
तव शुभ नामे जागे,
तव शुभ आशिष मांगे,
गाहे तव जय-गाथा।
जन-गण-मंगल-दायक जय हे
भारत-भाग्य -विधाता।
जय हे, जय हे, जय हे,
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च। अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि॥

*Prepared by*

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
*Website : www.scertkerala.gov.in*
*e-mail : scertkerala@gmail.com, Phone : 0471 - 2341883,*
*Typesetting and Layout : SCERT*
*First Edition : 2026*
*Printed at : Centre for Advanced Printing and Training (C- apt), Thiruvananthapuram-695013*

*© Department of General Education, Government of Kerala*

*ISBN 978-93-47213-36-6*

प्रियच्छात्राः,

एकादशवर्गे संस्कृतसाहित्यम् ऐच्छिकरूपेण अधीयानानां भवतां पुरतः संस्कृतसाहित्यपाठ्यपुस्तकम् इदं प्रस्तूयते । राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षणपरिषदा (NCERT) निर्दिष्टां पाठ्यपद्धतीम् अनुसृत्य राज्यस्तरीयं साहचर्यं च परिगणय्य एव अस्मिन् पाठभागाः निर्धारिताः। पाठ्यांशानां सम्यगवबोधनार्थम् आवश्यकं लघुव्याख्यानमपि अत्र आयोजितम् । अध्ययनोपकारकाणि अभ्यासकार्याणि च अस्मिन् समाकलितानि ।

तत्तद्विषये प्रवीणानां कलाशालाध्यापकानाम् अन्येषां शिक्षाशास्त्रज्ञानां च नेतृत्वे राज्य-शैक्षिक-अनुसन्धानप्रशिक्षणपरिषदा (SCERT) समायोजितायां शिल्पशालायामेव पुस्तकस्यास्य सम्पादनं कृतम् । सूचनाप्रोद्योगिकोपाधयः (ICT) राष्ट्रिय-कौशल-योग्यता-प्रारूपं (NSQF) नूतनपठनतन्त्राणि च पुस्तकेऽस्मिन् परिगणितानि सन्ति ।

स्वतन्त्रवाचनाय स्वतन्त्रचिन्तायै शास्त्रावबोधाय विशकलनात्मकचिन्तायै सर्गवैभवाय च अवसराः पुस्तकेऽस्मिन् समाकलिताः। अस्मिन् चत्वारि एककानि सन्ति। तत्र सुभाषितम्, रूपकम्, कथा, उपन्यासः, साहित्यविनोदः, वृत्तम्, अलङ्कारः इत्यादि विषयाः संकलिताः सन्ति। पाठपुस्तकमिदम् उद्दिष्टं कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे ।


भवदीयः

**डा. जयप्रकाश् आर्. के**

निदेशकः

राज्य-शैक्षिक अनुसन्धान-प्रशिक्षणपरिषद्

केरलम्

## TEXT BOOK DEVELOPMENT COMMITTEE

## XI - SANSKRIT OPTIONAL- SAHITHYA

### Advisor

**V Madhavan Pillai**, Associate Professor in Sanskrit (Rtd.),
Govt. Womens College, Thiruvananthapuram

### Chairperson

**Dr.K K Sundaresan**, Former Registrar, Keralakalamandalam, Thrissur

### Experts

**Dr.Anand Dilep Raj**, Asso. Prof. in Sanskrit (Rtd.), University College,TVPM
**Dr.G Sahadevan**, Prof. in Sanskrit (Rtd.), University College, TVPM

### Participants

**Ajitha O**, HSST Sanskrit, Govt.Sanskrit HSS Tripunithura, Ernakulam
**Madhu N**, HSST Sanskrit, KV Sanskrit HSS Muthukulam, Alappuzha
**Sajeev K**, HSST Sanskrit Govt.Sanskrit HSS Vadakara, Kozhikkode
**Shameer S**, HSST (Jr.) Sanskrit, Govt.Sanskrit HSS Vadakara, Kozhikkode
**V J Sreekumar**, HSST Sanskrit (Rtd.), Amrita Sanskrit HSS Parippally, Kollam
**Dr.Ullas N**, HSST Sanskrit (Rtd.), Govt.Sanskrit HSS Tripunithura, Ernakulam

### Artists

**Murukan Achari K**, Drawing Teacher, BRC, Nedumangad
**Gijo Soman**, Pandalam, Pathanamthitta
**Melvin Rubesh**, Kattappana, Idukki.
**Sarang S**, Attingal, Thiruvananthapuram

### DTP

**Manoj P G**, JLT Sanskrit, SGUPS Venamony, Idukki
**Sreejith S Chandran**, HST Sanskrit, Dr.CTEM St. Thomas VHSS Pannivizha, PTA
**Dr.Sudha A**, JLT Sanskrit, PSMGMUPS, Muttathara, Thiruvananthapuram

### Design and Layout

**Dr.Nidheesh M G**, HST Sanskrit, GHSS Chembuchira, Thrissur

### ACADEMIC CO-ORDINATORS

**V.Sreekantan, Research Officer in Sanskrit, SCERT Kerala**

**Dr.Ajeesh P T, Research Officer I/C Sanskrit, SCERT Kerala**

**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् केरलम्**
**State Council of Educational Research And Training (SCERT), Kerala**

# विषयानुक्रमणिका


| एककम् | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|
| 1. जीवनम् | 1. अमृतं वै जलम् | सुभाषितम् | 7 - 16 |
| | 2. करुणामृतम् | कथा | 17 - 22 |
| 2. मेलनम् | 3. प्रेमसङ्गीतम् | अनूदितकाव्यम् | 23 - 39 |
| | 4. स्वप्नाङ्कम् | रूपकम् | 40 - 51 |
| | 5. सम्बन्धाः सदनुष्ठिताः | काव्यम् | 52 - 65 |
| 3. सेवनम् | 6. संस्कृताय समर्पणम् | उपन्यासः | 66 - 75 |
| | 7. किमदेयं महात्मनाम् | कथा | 76 - 83 |
| 4. आस्वादनम् | 8. काव्यशास्त्रविनोदेन | सरसश्लोकाः | 84 - 91 |
| | 9. लावण्यवती वाणी | अलङ्कारः | 92 - 98 |
| | 10. वाणी रूपवती | वृत्तम् | 99 - 108 |


## पठनप्रवर्तनानां सूचकानि


आलपनम्


टिप्पणीलेखनम्


क्रमीकरणम्


परिवर्तनम्


संगोष्ठिः


परियोजना


अग्रिमपाठसम्बन्धः


नाटकावतारणम्

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

1 एककम्

# जीवनम्

साहित्यं शास्त्रं च मानवसमाजस्य महत्तरे द्वे सिद्धी भवतः। साहित्यस्य निधानं भवति भाषा। भाषारहितं साहित्यशून्यं च मनुजमधिकृत्य विभावयितुमेव न शक्यते। “अपारे काव्यसंसारे कविरेव प्रजापतिः”। तथैव प्रकृतिः सर्वचराचराणामधिष्ठानं तथा जलं जीवात्मभूतं च भवति। जलं विना न कश्चिदपि जीवनाय शक्यो भवति। अतः जलस्य जीवनमिति नामान्तरम् अस्ति। अत्र प्रथमैककस्य नाम जीवनम् इति। एककेऽस्मिन् द्वौ पाठौ स्तः। प्रथमपाठः ‘अमृतं वै जलम्’ इति भवति। पाठेऽस्मिन् जलस्य माहात्म्यमधिकृत्य कृतानि सुभाषितानि समाकलितानि भवन्ति। द्वितीयः ‘करुणामृतम्’ नाम कथापाठः भवति। अयं पाठभागः महाभारताद् उद्धृतः भवति। खाण्डववनदहनकथांशस्य उपाख्यानमेव पाठेऽस्मिन् उपवर्णितम्।



# 1 अमृतं वै जलम्




**पाठप्रवेशः**

भाषासु मधुरा मुख्या रम्या गीर्वाणभारती।
तस्यां हि मधुरं काव्यं तत्रापि च सुभाषितम् ॥

(सुभाषितरत्नभण्डागारम्)

संस्कृतभाषायाः महत्त्वमधिकृत्य चर्चां चालयति।

## आमुखम्

सुभाषितानि प्रायशः जीवितमूल्यानि उद्बोधयन्ति। अतः मूल्यबोधनाय सुभाषितपठनं बहूपकारकमेव। सुभाषितानि मुख्यतया मुक्तकविभागे अन्तर्भवन्ति। सुष्ठु भाषितं भवति सुभाषितम्। तदेवमुच्यते -

इतिहासपुराणेषु तथा रामायणादिषु।
वचनं सारभूतं यत्तत्सुभाषितमुच्यते ॥ इति।

उपदेशनिर्देशात्मकानि सद्भाषितानि भवन्ति सुभाषितानि। तानि चिन्तोद्दीपकानि प्रचोदनपराणि च। उत्तमव्यक्तित्वस्य सन्मनोभावस्य च विकासाय सुभाषितपठनं सहायकमेव। सामान्यतया विद्यामहत्त्वं, धीरता, दानमहत्त्वं, दयालुता, त्यागमनोभावः, सत्यस्य महत्त्वमित्यदीनां च सुष्ठु प्रतिपादनं सुभाषिते अन्तर्भवति। जलं तावत् मानवजीवने परमप्रधानं भवति। अतः जलमधिकृत्य कानिचन सुभाषितानि पठामः।

**1.** **इमा आपः शिवाः सन्तु**
**शुभाः सन्तु च निर्मलाः।**
**शीतलाः पावनाश्चैव**
**पूताः सूर्यस्य रश्मिभिः॥ (विष्णुसंहिता)**



**पदच्छेदः**

पावनाश्चैव - पावनाः+ च+ एव।

**विग्रहः**

निर्मलाः - निर्गतं मलं यस्मात् तत् निर्मलम्, ताः।

| **अन्वयः** | **अर्थः** |
|---|---|
| इमा आपः | - इमानि जलानि |
| शिवाः सन्तु | - मङ्गलकराः भवन्तु |
| शुभाः | - परिशुद्धाः |
| निर्मलाः च सन्तु | - मालिन्यरहिताःच भवन्तु |
| शीतलाः | - शीताः |
| पावनाः | - पवित्राः |
| सूर्यस्य रश्मिभिः | - सूर्यस्य किरणैः |
| पूताः च एव (सन्तु) | - शुद्धाः च भवन्तु। |

**भावार्थः**

इमा आपः मङ्गलकराः भवन्तु, परिशुद्धाः निर्मलाः च भवन्तु, पवित्राः शीताः सूर्यस्य किरणैः शुद्धाः च भवन्तु॥

**2.** **अद्भिः सर्वाणि भूतानि**
**जीवन्ति प्रभवन्ति च।**
**तस्मात् सर्वेषु दानेषु**
**तोयदानं विशिष्यते॥ (महाभारतम्, शान्तिपर्व)**

**विग्रहः**

तोयदानम् - तोयस्य दानम्।

| **अन्वयः** | **अर्थः** |
|---|---|
| सर्वाणि भूतानि - | सर्वे जन्तवः |
| अद्भिः - | जलैः |

| | | |
|---|---|---|
| जीवन्ति | - | जीवनं कुर्वन्ति |
| प्रभवन्ति च | - | उद्भवन्ति च |
| तस्मात् | - | अतः |
| सर्वेषु दानेषु | - | सर्वदानकर्मसु |
| तोयदानं | - | जलदानम् |
| विशिष्यते | - | अतिविशिष्टं (भवति)। |

**भावार्थः**

सर्वभूतानि जलैः उद्भवन्ति वर्धन्ते च। अतः सर्वदानेषु जलदानं श्रेष्ठं भवति। अतः जलदानं महादानमिति कथ्यते।

3. **अजीर्णे भेषजं वारि**
**जीर्णे वारि बलप्रदम्।**
**भोजने चामृतं वारि**
**भोजनान्ते विषप्रदम्॥ (महासुभाषितसंग्रहः)**

**पदच्छेदः**

चामृतम् = च + अमृतम्

**विग्रहः**

विषप्रदम् - विषं प्रददाति इति।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अजीर्णे | - | दहनरहितावस्थायाम् |
| वारि | - | जलम् |
| भेषजं | - | औषधम् (भवति) |
| जीर्णे | - | दहनप्रक्रियायाम् |
| वारि | - | जलम् |
| बलप्रदम् | - | शक्तिप्रदम् (भवति) |
| भोजने | - | भोजनावसरे |
| वारि अमृतं | - | जलम् अमृतम् |
| भोजनान्ते | - | भोजनावसाने (जलम्) |
| विषप्रदं च | - | विषकरं च (भवति)। |

**भावार्थः**

अजीर्णावस्थायां शुद्धजलपानम् औषधं भवति। दहनप्रक्रियायां शुद्धजलपानं शक्तिदायकं भवति। भोजनावसरे शुद्धजलपानम् अमृतं भवति। भोजनावसाने जलपानं विषकरं भवति।

**4.** **पानीयं प्राणिनां प्राणाः**
**विश्वमेव च तन्मयम्।**
**न हि तोयाद्विना वृत्तिः**
**स्वस्थस्य व्याधितस्य वा॥ (अष्टाङ्गसंग्रहः)**

**पदच्छेदः**

तोयाद्विना - तोयात् +विना।

**विग्रहः**

स्वस्थः - स्वस्मिन् तिष्ठति इति।

पानीयम् - पातुं योग्यम्।

| अन्वयः | | अर्थः |
|---|---|---|
| प्राणिनां प्राणाः | - | जन्तूनां जीवः |
| पानीयं | - | जलम् (भवति) |
| विश्वं च | - | जगत् च |
| तन्मयम् एव | - | जलमयमेव |
| स्वस्थस्य | - | रोगरहितस्य |
| व्याधितस्य वा | - | रोगिणः वा |
| वृत्तिः | - | स्थितिः |
| तोयात् | - | जलात् |
| विना न हि | - | विना साध्यं न भवति। |

**भावार्थः**

प्राणिनां जीवः भवति जलम्। जगदपि जलमयं भवति। रोगरहितस्य रोगिणः वा सुस्थितिः जलात् एव साध्या भवति।

**5.** **जलं तथा स्थलं नून-**
**ममूल्यमिति चिन्तय।**
**ततस्तयोरुपयोगं**
**सदा कुरु यथाविधि॥ (प्रमोदमञ्जरी)**

**पदच्छेदः**

ततस्तयोरुपयोगम् = ततः+ तयोः+ उपयोगम्

**विग्रहः**

यथाविधि - विधिम् अनतिक्रम्य ।

| अन्वयः | | अर्थः |
|---|---|---|
| जलं | - | तोयम् |
| तथा स्थलं | - | तथा भूमिः |
| नूनम् अमूल्यम् | - | निश्चयेन मूल्यातीतम् |
| इति चिन्तय | - | इति विचारय |
| ततः | - | तस्मात् |
| तयोः | - | जलस्थलयोः |
| उपयोगं च | - | उपयोगमपि |
| सदा | - | सर्वदा |
| यथाविधि कुरु | - | यथायोग्यं कुरु । |

**भावार्थः**

जलम् तथा स्थलं च अमूल्ये भवतः । अतः जलस्थलयोः उपयोगं यथाविधि कुरु ।

## पठनप्रवर्तनानि



**सुभाषितानि सतालम् आलपतु ।**

**श्रद्धेयाः अंशाः -**

सुभाषितानां वाचनम्

सतालालपनम्

सभावालपनम् ।



**पदान्तर्गतानि अक्षराणि विविच्य पदान्तानि लिखतु ।**

**श्रद्धेयाः अंशाः -**

पदानां पठनम्

अक्षरविवेचनम्

पदान्तलेखनम् ।

**पाठभागं व्याख्यानं च पठित्वा चर्चां कृत्वा प्रथमाविभक्तिपदानि लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

आशयग्रहणम्

पदवाक्यलेखनम्।

**पाठं व्याख्यानं च पठित्वा चर्चां कृत्वा पाठभागस्थश्लोकानाम् अन्वयम् आशयं च लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

श्लोकस्याशयग्रहणम्

अन्वयलेखनम्

आशयलेखनम्।

**पाठभागं व्याख्यानं च पठित्वा चर्चां कृत्वा लकाराणां पट्टिकां लिखतु।**

**श्रद्धेयाः अंशाः-**

चर्चायाः भागभागित्वम्

आशयग्रहणम्

पट्टिकाकरणम्।

**पाठभागं व्याख्यानं च पठित्वा जलस्य महत्वमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

आशयग्रहणम्

टिप्पणीलेखनम्।

**पाठभागस्य आमुखं, व्याख्यानं च पठित्वा चर्चां कृत्वा सुभाषितान्यधिकृत्य टीकां लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

आशयग्रहणम्

टीकालेखनम्।

जलस्य मलिनीकरणमधिकृत्य चर्चां कृत्वा संगोष्ठीं प्रचालयतु ।

**श्रद्धेयाः अंशाः -**

आशयग्रहणम्

दत्तशेखरणे भागभागित्वम्

संगोष्ठीप्रचालनम् ।

पाठभागं पठित्वा चर्चां कृत्वा प्रश्नोत्तराणि निर्मीय लिखतु ।

**श्रद्धेयाः अंशाः -**

चर्चायां भागभागित्वम्

आशयग्रहणम्

उत्तराणां लेखनम् ।

## व्याकरणकार्यम्

### क) पदान्तपरिचायनम् ।

नामशब्दानां प्रकृतिभूतं शब्दरूपं प्रातिपदिकसंज्ञा इति व्यपदिश्यते । तैः सुप्प्रत्ययान् योजयित्वा नामपदानां सिद्धिः । पदान्तं निर्धारयितुं पदस्य वर्णविच्छेदः करणीयः। पदान्ते यः वर्णः भवति तत् पदं तस्य वर्णस्य नाम्ना अभिधीयते । यथा -

राम - र् + आ+ म् +अ = अकारान्तः

लीला - ल् +ई +ल् + आ = आकारान्तः

कवि - क् +अ + व् +इ = इकारान्तः

गुरु - ग् +उ+ र् +उ = उकारान्तः।

### ख) विभक्तिपठनम् - प्रथमाविभक्तिः

അതെന്നു പ്രഥമക്കർത്ഥം - ബാലപ്രബോധനം

### पदानि

बालः। वृक्षः। ललिता। नदी। वनम्।

### वाक्यानि

| | |
|---|---|
| भवती गायति | वाहनं गच्छति |
| सः धावति | सा पृच्छति |
| तत् पतति | अहं गच्छामि |
| त्वम् गच्छसि | अहं पश्यामि । |

### श्लोकः

***काकः कृष्णः पिकः कृष्णः***
को ***भेदः*** पिककाकयोः।
वसन्तकाले सम्प्राप्ते
***काकः काकः पिकः पिकः***॥

### ग) क्रियापदपरिचायनम् - लकाराः।

क्रियारूपाणां प्रकृतिः भवति धातुः। तेन सह तिङ् प्रत्ययानां योजनेन क्रियारूपाणि सिद्ध्यन्ते। अतः तानि तिङन्तानि इत्यभिधीयन्ते। तेषाम् आत्मनेपदिनः परस्मैपदिनः इति भेदेन द्वैविध्यं वर्तते। केचन धातवः उभयपदिनः च। लकाराः काल-प्रकारवाचिभेदेन दशधा। ते लट्, लिट्, लुट्, लृट्, लेट्, लोट् लङ्, लिङ्, लुङ्, लृङ् च। तेषु लेट् वेदे एव प्रयुज्यते।

लट् वर्तमाने लेट् वेदे भूते लङ्लुङ्लिटस्तथा।
विध्याशिषोस्तु लिङ्लोटौ भाव्यर्थे च लृङ्लृटौ लुट्॥

| कालवाचिलकाराः | लट् | लङ् | लुङ् | लिट् | लृट् | लुट् |
|---|---|---|---|---|---|---|

| प्रकारवाचिलकाराः | लोट् | विधिलिङ् | आशिर्लिङ् | लृङ् |
|---|---|---|---|---|

आत्मनेपदक्रियापदानाम् उदा - एधते, वन्दते, जायते, सेवते...
परस्मैपदक्रियापदानाम् उदा - पठति, लिखति, गच्छति, चरति ...
उभयपदक्रियापदानाम् उदा - नयते-नयति, पचते-पचति....।

### व्याकरणविशेषः

तोयात् विना - विना शब्दयोगे द्वितीया, तृतीया, पञ्चमी च भवति।
आपः - आपः इति नित्यं बहुवचनरूपं भवति।

## अभ्यासप्रश्नाः

1. अधः प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

. इमा आपः शिवाः सन्तु
शुभाः सन्तु च निर्मलाः।
शीतलाः पावनाश्चैव
पूताः सूर्यस्य रश्मिभिः॥

क) निर्मलाः इति पदस्य विग्रहं लिखत।

ख) पावनाश्चैव इति पदस्य पदच्छेदं लिखत।

ग) श्लोकस्यास्य आशयं स्ववाक्यैः लिखत।

2. सूचनां पठित्वा "जलस्य महत्त्वम्" अधिकृत्य एकां टिप्पणीं लिखत।

सूचनाः - इमाः आपः शिवाः सन्तु।
सर्वेषु दानेषु तोयदानं विशिष्यते।
पानीयं प्राणिनां प्राणाः।
जलम् अमूल्यम्।

3. प्रस्तावनां कारणं च पठित्वा उत्तरं चित्त्वा लिखत।

प्रस्तावना – मूल्यबोधने सुभाषितानाम् अतिप्राधान्यमस्ति।

कारणम् - तेषु सदुपदेशाः तथा सच्चिन्ताः च सन्ति।

क) प्रस्तावना साधु कारणम् असाधु।

ख) प्रस्तावना साधु कारणं साधु।

ग) प्रस्तावना असाधु कारणम् असाधु।

घ) प्रस्तावना असाधु कारणम् साधु।

4. "आपः" इति पदं पठित्वा वर्णविच्छेदं कृत्वा पदान्तं लिखत।

5. " व् + आ + र्+ इ " = ---------- अत्र पदं पदान्तं च लिखत।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| आपः | जलम् | ജലം | water |
| निर्मला | मालिन्यरहिता | മാലിന്യമില്ലാത്തത് | pure |
| प्रभवन्ति | उद्भवन्ति | ഉദ്ഭവിക്കുന്നു | originate |
| भेषजं | औषधम् | മരുന്ന് | medicine |
| स्वस्थः | रोगरहितः | ആരോഗ്യവാൻ | healthy man |
| अमूल्यम् | मूल्यातीतम् | വിലമതിക്കാനാകാത്തത് | invaluable |
| तरुः | वृक्षः | മരം | tree |
| अश्म | शिला | കല്ല് | stone |

जलं प्रकृतिजीवातुः
पालनीयं सदा जनैः ॥



# 2 करुणामृतम्

**पाठप्रवेशः**

पूर्वस्मिन् पाठे जलस्य प्राधन्यमधिकृत्य पठितम्। प्रकृतेः संरक्षणं कथं करणीयम् ? वनसंरक्षणमपि अत्यावश्यकम्। यदि वयं प्रकृतेः रक्षणं न कुर्मः तर्हि किं स्यात्? प्राकृतिकापदः केवलं मनुष्याणामेव दुरितदायकाः भवन्ति किम्? प्रकृतिक्षोभाः जन्तुजालानि कथं बाधन्ते इति भवन्तः जानन्ति वा? कृमिकीटाः एतादृशेषु सङ्कटेषु जीवितुं शक्नुवन्ति किम्?

## आमुखम्

घटनानां शृङ्खलारूपम् आख्यानं भवति कथा। कथासु विविधाः आशयाः गुणपाठाः च अन्तर्भवन्ति। कथाभिः सम्पन्नं भवति संस्कृतसाहित्यम्। इतिहासपुराणादीनि पञ्चतन्त्रहितोपदेशादीनि च तत्र उदाहरणानि। मानवाः वृक्षलतादयः पक्षिमृगादयः च तत्र कथापात्राणि भवन्ति। तादृशीभिः कथाभिः समृद्धं भवति महाभारतम्। अस्य प्रणेता कृष्णद्वैपायनव्यासो भवति। पञ्चमो वेदः इति ख्यातिः महाभारतस्य वर्तते। सपादैकलक्षश्लोकात्मकोऽयं ग्रन्थः अष्टादशपर्वसु विभक्तः। मानवजीवने उपकारकाः विविधाः विषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति। महाभारतस्य आदिपर्वणि विद्यमाने शार्ङ्गकोपाख्याने अग्निदेवः खाण्डववनम् अश्नाति इति कथा वर्णिता। तस्य कथांशस्य संग्रह एव अस्मिन् पाठभागे आविष्कृतः।



खाण्डवाख्ये कानने जरिता नाम एका शार्ङ्गकखगी निवसति स्म। तस्याः अजातपक्षाः चत्वारः शाबकाः आसन्। सा तान् अतीव वात्सल्येन स्नेहेन च पालितवती। एकदा वने महाग्निः प्रज्वलितः अभवत्। शार्ङ्गकशिशून् पश्यन्ती माता विललाप - "सर्वदाहको अग्निः आगच्छत्। समयेऽस्मिन् पक्षशून्याः शाबकाः डयितुं न शक्नुवन्ति नूनम्। तान् त्यक्त्वा पलायनम् चिन्तयितुम् अपि न शक्नोमि। तेषां त्राणनोपायं न पश्यामि। पक्षान्तः सर्वान् नीत्वा वयं सर्वे मृताः भवामः" इति।

मातृविलापं श्रुत्वा शाबकाः एवम् अवदन् "मातः ! अग्नौ मा म्रियस्व, मातरं विना अस्माकं वंशः कथं वर्धेत? सर्वविनाशार्थम् अस्मासु मा स्निह्यतु"। स्वसन्ततिरक्षणस्य उपायम् अन्विष्यमाणा सा माता समीपस्थं मूषकबिलं दृष्ट्वा स्वशाबकान् अवदत् – "पश्यत, तत्रस्थे बिले युष्मान् स्थापयितुं शक्नोमि। यदा पावकः शान्तः तदा अहं पुनरागत्य रक्षिष्यामि"।

श्रुत्वैतत् कश्चन शार्ङ्गकशिशुः अवदत्-"मूषकेण हननं न हितकरम्। अग्नौ दहनमेव बहु श्रेयस्करम्। परन्तु मृत्युः पूर्वमेव निर्धारितः अस्ति। अम्ब ! झटिति इतो निर्गच्छ"। एवमुक्त्वा ते प्राणरक्षार्थम् अग्निदेवं प्रार्थयितुम् आरभन्त च।

शाबकानामाकुलतां दृष्ट्वा सर्वदाहकस्य अग्नेरपि मनसि कारुण्यमाविर्बभूव। अतः एव अग्निः तान् अस्पृष्ट्वा शान्तोऽभवत्। यदा जरिता प्रत्यागता तदा जीवतः स्वशाबकान् दृष्ट्वा अग्नेः कारुण्यमेव शिशूनां जीवामृतमिति विज्ञाय सा अतिसन्तुष्टा अभवत्। ते शिशवः प्रेमपूर्णैः शब्दैः मातुः स्वागतं कृतवन्तः। उक्तञ्च -

वायुरापः प्रकाशश्च
सर्वे प्रकृतिजाः खलु।
जीवदाः मानवाः पश्य
प्रकृतिं परिपालय॥

(प्रमोदमञ्जरी)



## पदच्छेदः

समयेऽस्मिन् = समये + अस्मिन् ।
अद्यापि = अद्य + अपि ।
पुनरागत्य = पुनः + आगत्य ।
श्रुत्वैतत् = श्रुत्वा + एतत् ।

## विग्रहः

महाग्निः - महान् च असौ अग्निः च ।
अजातपक्षाः - जातौ पक्षौ यस्य सः जातपक्षः, न जातपक्षः अजातपक्षः, ते ।
शार्ङ्गकशिशुः - शार्ङ्गकस्य शिशुः ।
पक्षान्तः - पक्षयोः अन्तः ।

## पठनप्रवर्तनानि

### कथां भावानुसारम् अवतारयतु ।

**श्रद्धेयाः अंशाः –**

उच्चारणशुद्धिः
भावात्मकता
आशयावगमनम् ।

### पाठभागात् समानार्थकपदानि चित्वा लिखतु ।

क) अग्निः - ..............................
ख) शाबकाः - ..............................
ग) अम्ब - ..............................

**श्रद्धेयाः अंशाः –**

अर्थावगमनम्
पदावलीपरिचयः
आशयावगमनम् ।



**कथां पठित्वा कथास्तंभान् क्रमीकरोतु ।**

- ते शिशवः प्रेमपूर्णैः शब्दैः मातुः स्वागतं कृतवन्तः।
- पक्षान्तः सर्वान् नीत्वा वयं सर्वे मृताः भवामः।
- खाण्डवं नाम कानने जरिता नाम एका शार्ङ्गकखगी निवसति स्म ।
- सर्वदाहकोऽग्निः आगच्छत् ।
- ते प्राणरक्षार्थम् अग्निदेवं प्रार्थयितुम् आरभन्त ।

**श्रद्धेयाः अंशाः -**

आशयग्रहणम्
उचितक्रमीकरणम्
लेखनम् ।



**कथाभागात् क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययपदानि चित्वा पट्टिकां पूरयतु ।**

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| | | |
| | | |

**श्रद्धेयाः अंशाः -**

पाठभागस्य वाचनम्
अव्ययानाम् अवगमनम्
पट्टिकायां लेखनम् ।



**पाठभागं पठित्वा 'प्रकृतेः प्राणिनां च पारस्पर्यम्' इति विषयम् अधिकृत्य कक्ष्यायां संगोष्ठीं चालयतु। टिप्पणीं च लिखतु ।**

**श्रद्धेयाः अंशाः -**

आशयग्रहणम्
लघुवाक्यैः आशयक्रोडीकरणम्
उचितवाक्यैः टिप्पणीलेखनम् ।



**कथाभागं लघुसंभाषणरूपेण परिवर्तयतु ।**

**श्रद्धेयाः अंशाः -**

पाठभागस्य वाचनम्
आशयग्रहणम्
संभाषणरूपेण परिवर्तनम्
अवतारणम् ।



**कथाभागं संगृह्य लिखतु।**

**श्रद्धेया: अंशा: -**

आशयग्रहणम्

लघुवाक्यै: आशयक्रोडीकरणम्

उचितपदै: लेखनम्।

## अभ्यासप्रश्न:

**1. प्रस्तावनाया: कारणस्य च साधुतां परिशोधयतु।**

प्रस्तावना - पावक: शाबकान् अस्पृष्ट्वा शान्तोऽभवत्।

कारणम् - अग्निदेवे कारुण्यं न अजायत।

i) प्रस्तावना साधु कारणम् असाधु।

ii) प्रस्तावना असाधु कारणं साधु।

iii) प्रस्तावना असाधु कारणम् असाधु।

iv) प्रस्तावना साधु कारणम् साधु।

## व्याकरणकार्यम्

### क) विभक्तिपठनम् – द्वितीयाविभक्ति:।

ദ്വിതീയക്കതിനെ പുനഃ (ബാലപ്രബോധനം)

ദ്വിതീയാ - അതിനെ, അതിനോട്, അതിലേക്ക്

### पदानि

वृक्षम्, मालाम्, लेखनीम्, वनम्

### वाक्यानि

स: ***वृक्षम्*** आरोहति।

सा ***मालां*** धरति।

छात्रा ***लेखनीं*** स्वीकरोति।

बाल: ***वनं*** गच्छति।

### श्लोक:

***रामं दशरथं*** विद्धि ***मां*** विद्धि ***जनकात्मजाम्***।

***अयोध्याम् अटवीं*** विद्धि गच्छ तात यथासुखम्।

(रामायणम्)

## ख) क्रियापदपरिचायनम्

लट् लकारः – वर्तमाने लट् । भू सत्तायां परस्मैपदी लट्

| | | |
|---|---|---|
| भवति | भवतः | भवन्ति |
| भवसि | भवथः | भवथ |
| भवामि | भवावः | भवामः। |

मा भूत् - माङ् योगे लुङ् लकारः ।

निवसति स्म - स्मयोगे भूतकालार्थः ।

## कोशः

कानन‍म् - अटव्यरण्यं विपिनं गहनं काननं वनम् ।

खगः - खगे विहङ्गविहगविहङ्गमविहायसः।
शकुन्ति पक्षि शकुनिशकुन्तशकुनद्विजाः ॥

मूषकः - उन्दुरुर्मूषकोप्याखुर्गिरिकाबालमूषिका ।

बिलम् - कुहरं सुषिरं विवरं बिलम् ।

वंशः - वंशोऽन्ववायः सन्ताने वर्णाः ।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| काननम् | वनम् | വനം | Forest |
| अजातपक्षः | अनुत्पन्नपक्षः | ചിറക്മുളക്കാത്ത പക്ഷി | a bird that has not grown wings |
| शावकाः | पोताः | പക്ഷിക്കുഞ്ഞുങ്ങൾ | infants |
| त्राणनोपायः | संरक्षणोपायः | രക്ഷിക്കാനുള്ള മാർഗം | means to protect |
| नीत्वा | नयनं कृत्वा | നയിച്ചിട്ട് | having led |
| व्यर्थम् | निरर्थकम् | നിഷ്പ്രയോജനം | futile |
| बिलम् | सुषिरम् | മാളം | Burrow/ Hole |
| पावकः | अग्निः | തീയ് | Fire |
| मृत्युः | मरणम् | മരണം | Death |
| झटिति | सहसा | പെട്ടെന്ന് | Suddenly |

कारुण्यस्य हि साकल्यं
स्नेहभावेऽवतिष्ठते ।

2 एककम्

# मेलनम्



"सुखं परेषां नियतं सुखं मे दुःखं मदीयं परदुःखमेव" वाक्यमिदं मानविकतायाः महत्त्वपूर्णः सन्देशः भवति । सा मानविकता समाजस्य सुस्थितेः प्रगतेश्च आधारः भवति । सर्वसमभावना मानविकतारूपेण निरूप्यते । आर्द्रता, कारुण्यं, स्नेहः, दया, साहोदर्यम् इत्यादि गुणाः मानविकतां परिपोषयन्ति । मेलनमिति नामकेऽस्मिन् एकके त्रयः पाठाः सन्ति । प्रथमः पाठः उल्लूर् एस् परमेश्वर अय्यर् महाशयस्य प्रेमसङ्गीतस्य डा.एन् गोपालपिल्ला महोदयेन अनूदिताः केचन श्लोकाः सन्ति । पाठस्य नाम 'प्रेमसङ्गीतम्' इति । द्वितीयः पाठो भवति 'स्वप्नाङ्कम्' । भासेन विरचितस्य स्वप्नवासवदत्तस्य पञ्चमाङ्कात् उद्धृतः अंशः अत्र वर्णितः। तृतीयः पाठः तु 'सम्बन्धाः सदनुष्ठिताः' इति । कुमारसम्भवस्य षष्ठसर्गात् समाकलितानि कानिचन पद्यानि पाठेऽस्मिन् निबद्धानि ।

# 3 प्रेमसङ्गीतम्



**पाठप्रवेशः**

एते के इति जानन्ति वा? एतेषां कृतीः अधिकृत्य जानन्ति वा ?

## आमुखम्

आधुनिकमलयालकवित्रये अन्यतमेन उल्लूर् एस् परमेश्वर अय्यर् महोदयेन विरचितम् अद्वितीयं भावगीतं भवति प्रेमसङ्गीतम्। अस्मिन् भावगीते प्रेम्णः महत्त्वं वर्णयत्ययं कविवरः। विश्वस्य कृते जीवचैतन्यं दातुं सक्षमः एक एव यः धर्मः विद्यते स एव प्रेमा। सः समस्तमानवेभ्यः स्तन्यं दातुं शक्तः इति कविः निस्संशयं प्रस्तौति । काव्येऽस्मिन् भक्तिः प्रणयः वात्सल्यं कारुण्यं दयेत्यादि मानविकगुणान् विशदयति महाकविः । वस्तुतः अहमेव अयं प्रपञ्चः ईश्वरोऽप्यहमेव इति विश्वप्रेम्णः सारं भावगीतेऽस्मिन् विवृणोत्ययं महाकविः ।



## महाकविः उल्लूर् एस् परमेश्वर अय्यर्

आधुनिकमलयालकवित्रये अन्यतमो भवति उल्लूर् एस् परमेश्वर अय्यर्।

उल्लूर् एस् परमेश्वरैय्यर् महोदयः 1877 तमे वर्षे चङ्ङनाश्शेरि समीपस्थे पेरुन्नग्रामे जन्म लेभे। तस्य पिता सुब्रह्मण्य अय्यर् माता भगवति अम्माल् च भवति।

पितुः अकालमृत्योरनन्तरं कविः मात्रा साकं तिरुवनन्तपुरे उल्लूर् ग्रामं गत्वा शिष्टजीवनं तत्र अनयत्। अनुगृहीतकविः, भाषासंशोधकः, साहित्येतिहासकारश्च आसीत् अयं महाशयः। सः तिरुविताङ्कूर्-सर्वकारे मुख्यकार्यदर्शी इति स्थानम् अलङ्कृतवानासीत्।

उमाकेरलम्, वञ्चीशगीतिः, कर्णभूषणम्, चित्रशाला, मणिमञ्जूषा च अस्य कृतिषु प्रसिद्धाः। केरलसाहित्यचरित्रम्, सदाचारदीपिका, गद्यमालिका, विज्ञानदीपिका च अस्य प्रधानगद्यग्रन्थाः भवन्ति। तेन विरचितायाः प्रेमसङ्गीताख्यकवितायाः डा. एन् गोपालप्पिल्ला महाशयेन अनूदितानि पद्यानि पाठभागेऽस्मिन् समाकलितानि।



## डा एन्. गोपालपिल्ला

संस्कृतपण्डितः जीवनचरितलेखकः निरूपकश्च डा. एन् गोपालपिल्ला महोदयः कोल्लं जिल्लायां उमयनल्लूर् ग्रामे 1901 आगस्ट् मासस्य 15 तमे दिनाङ्के जनिमलभत। अस्य पिता शङ्कुप्पिल्ला माता कुट्टिक्काट्ट् नारायणियम्मा च भवति। उमयनल्लूर्ग्रामे प्राथमिकविद्याभ्यासानन्तरं तिरुवनन्तपुरस्थात् महाराजमहाविद्यालयात् संस्कृतसाहित्ये स्नातकोत्तरपदवी अनेन सम्पादिता। तदनन्तरं संस्कृतमहाविद्यालये अष्टादशवर्षाणि यावत् प्रांशुपालः आसीत्। संस्कृते कैरल्याम् आङ्गले च अनेन बहवो ग्रन्थाः विरचिताः।

उल्लूर् एस् परमेश्वर अय्यर् महोदयस्य प्रेमसङ्गीतम् तथा कुमारनाशान् महोदयस्य चिन्ताविष्टयाय सीता च अनेन संस्कृतभाषया अनूदिते। एतदुभयमपि 'केरलप्रतिभा' इति नाम्ना विख्यातो वर्तते। रविन्द्रनाथ टागोर् महोदयस्य गीताञ्जल्याः तथा कुमारनाशान् महोदयस्य करुणायाः च अनुवादोऽपि अनेन कृतः। मलयालभाषाविज्ञानकोशस्य सम्पादकः प्रकाशकश्च आसीदयं बहुभाषापण्डितः।



1. **एको हि धर्मः प्रथितः पृथिव्यां**
**प्रेमा प्रपञ्चस्य स एव जीवः ।**
**स एव नः पायसपारणायै**
**पीयूषवर्षी नवपार्वणेन्दुः ॥**

## पदच्छेदः

एको हि = एकः + हि ।

| अन्वयः | अर्थः |
|---|---|
| पृथिव्यां प्रथितः | - भूम्यां प्रशस्तः |
| एको हि धर्मः | - एकः एव धर्मः |
| प्रेमा स एव | - स एव स्नेहः |
| अस्य प्रपञ्चस्य | - अस्य विश्वस्य |
| जीवः | - जीवचैतन्यम् |
| नः पायसपारणायै | - अस्माकं पायसपानाय |

| | |
|---|---|
| पीयूषवर्षी | - क्षीरामृतवर्षकः |
| नवपार्वणेन्दुः | - नवपूर्णचन्द्रः |
| स एव | - प्रेमा एव। |

**भावार्थः**

विश्वे प्रसिद्धः धर्मः एकः एव। स प्रेम प्रपञ्चस्य जीव एव भवति। अस्मभ्यः सदा क्षीरामृतवर्षी पूर्णचन्द्रो भवति स प्रेम।

**कोशः**

पृथिवी - भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणी ज्या कश्यपी क्षितिः।

2. **नानाप्रकारं करुणानुराग-**
**भक्त्यादिरूपाणि सदा दधानम्।**
**परात्मचैतन्यमयं तनोति**
**प्रभाभिषेकं जगतः प्रकामम्॥**

| अन्वयः | अर्थः |
|---|---|
| नानाप्रकारं | - विविधानि |
| करुणानुरागभक्त्यादिरूपाणि | - दयास्नेहभक्त्यादिरूपाणि |
| सदा दधानं | - सर्वदा धारयन्तम् |
| परात्मचैतन्यमयं | - परमात्मचैतन्यात्मकं |
| तत् | - सः (प्रेमा) |
| जगतः | - विश्वस्य (कृते) |
| प्रभाभिषेकं | - प्रकाशपूर्णतां |
| प्रकामं तनोति | - यथेष्टं विकिरति। |

**आशयः**

कारुण्यस्नेहभक्त्यादिरूपैः विशिष्टः सः स्नेहः भुवने सर्वत्र परात्मचैतन्यरूपः प्रकाशपूर्णतां विकिरन्नेव विराजते।

3 **यदस्ति नास्तिक्यमिति प्रसिद्धं**
**द्वेषः स एव द्विषदस्ति तस्य।**
**यो हन्त तत्सन्तमसे निमग्नो**
**गतिर्मृतिस्तस्य भवेदकाले॥**

**पदच्छेदः**

| | |
|---|---|
| यदस्ति | = यत् + अस्ति। |
| द्विषदस्ति | = द्विषत् + अस्ति। |
| यो हन्त | = यः + हन्त। |
| गतिर्मृतिस्तस्य | = गतिः+ मृति: + तस्य |
| भवेदकाले | = भवेत् + अकाले |

**विग्रहः**

नास्तिकस्य भावः - नास्तिक्यम्।

| अन्वयः | अर्थः |
|---|---|
| नास्तिक्यमिति | - नास्तिकता इति |
| प्रसिद्धं यदस्ति | - प्रशस्तं यत् भवति |
| द्वेषः स एव | - विरोधः स एव |
| तस्य द्विषदस्ति | - प्रेम्णः( स्नेहस्य) शत्रुः भवति |
| यः | - यः (मनुष्यः) |
| तत् सन्तमसे निमग्नः | - तस्मिन् अन्धकारे निमग्नः |
| हन्त! | - कष्टम् ! अहो ! |
| तस्य गतिः | - तस्य अवस्था |
| अकाले | -अप्रतीक्षिते काले |
| मृतिः भवेत् | - मरणमेव स्यात्। |

**भावार्थः**

प्रेम्णः शत्रुः यः द्वेषभावः विद्यते स एव नास्तिकता। यः तस्मिन् नास्तिक्ये निमग्नः, तस्य अकालमरणम् एव भविष्यति।

4. **कृतान्वयान्येव पदानि नूनं**
**भवन्ति वाक्यं विशदार्थयुक्तम्।**
**श्रुतिश्च तालो मिलितौ यतो हि**
**ददाति सङ्गीतमिदं मुदं नः ॥**

**पदच्छेदः**

| | |
|---|---|
| कृतान्वयान्येव | = कृतान्वयानि + एव। |
| श्रुतिश्च | = श्रुति : + च। |

सङ्गीतमिदम् = सङ्गीतम्+ इदम्।

| अन्वयः | अर्थः |
|---|---|
| पदानि नूनं | - पदानि निश्चयेन |
| कृतान्वयानि भवन्ति | - अन्वितानि भवन्ति |
| वाक्यं विशदार्थयुक्तम् | - वाक्यम् अर्थसम्पुष्टं |
| एव | - एव (भवति) |
| यतो हि | - यस्मात् |
| श्रुतिः तालः च | - (सङ्गीतस्य) श्रुतिः तालः च |
| मिलितौ | - सम्मिलितौ |
| इदं सङ्गीतं | - एतत् सङ्गीतम् |
| नः | - अस्माकम् |
| मुदं ददाति | - आनन्दं प्रयच्छति। |

**भावार्थः**

यदा पदानि परस्परमन्वितानि भवन्ति तदा वाक्यम् अर्थसम्पुष्टं भवति। एवं श्रुतितालयोः मेलनेनैव गीतं श्रोत्रसुखानुभूतिं प्रददाति। अर्थात् परस्पराश्रयत्वं प्रधानमिति भावः।

5. **मधुव्रता मानसशीतलिम्ने**
**श्रयन्ति सूनानि मरन्दवन्ति।**
**सुमानि फुल्लानि समाश्रयन्ते**
**भृङ्गान् भुवं स्वां तु दिवं विधातुम्॥**

**विग्रहः**

मानसशीतलिम्ने - शीतलस्य भावः शीतलिमा, मानसस्य शीतलिमा मानसशीतलिमा, तस्यै।

| अन्वयः | अर्थः |
|---|---|
| मानसशीतलिम्ने | - मानसतृप्त्यै |
| मधुव्रताः | - भ्रमराः |
| मरन्दवन्ति | - मधुपूर्णानि |
| सूनानि श्रयन्ति | - पुष्पाणि आश्रयन्ते |
| फुल्लानि | - विकसितानि |
| सुमानि तु | - कुसुमानि तु |



स्वां भुवं - स्वकीयां भूमिं
दिवं विधातुं - स्वर्गं कर्तुम्
भृङ्गान् - भ्रमरान्
समाश्रयन्ते - सम्यक् आश्रयन्ते।

**भावार्थः**

भ्रमराः मानसतृप्त्यै मकरन्दपूर्णानि कुसुमानि आश्रयन्ति। एवं कुसुमानि परागणाय भृङ्गानपि अपेक्षन्ते। एवमेव भुवः स्वर्गसमानो भवति।

**कोशः**

भृङ्गः - त्वक्पत्र उत्कट भृङ्ग त्वचमोच वराङ्गकः।
मकरन्दः - मकरन्द पुष्परसमधु क्षौद्र मक्षिका मधु।

6. **प्रभामयं विश्वमिदं हि यस्य**
**सुदीपिका कापि चकास्ति हस्ते।**
**सुशुभ्रता चेतसि शोभते चेत्**
**तस्यामृतानन्दमयं च विश्वम्॥**

**पदच्छेदः**

कापि = का + अपि
तस्यामृतानन्दमयम् = तस्य + अमृतानन्दमयम्।

| अन्वयः | अर्थः |
|---|---|
| यस्य हस्ते | - यस्य करे |
| कापि सुदीपिका | - काचन उत्तमदीपिका |
| चकास्ति | - शोभते |
| तस्य इदं विश्वं | - तादृशस्य एषा भूमिः |
| प्रभामयं हि | - प्रभापूर्णम् एव |
| चेतसि | - मनसि |
| सुशुभ्रता | - शुद्धता |
| शोभते चेत् | - प्रकाशते चेत् |
| तस्य विश्वम् | - तस्य प्रपञ्चः |
| अमृतमयं च(भवति) | - अमृतमेव । |

## भावार्थः

यस्य हस्ते दीपः अस्ति तस्य विश्वमिदं प्रभापूर्णं भाति । तद्वद् यस्य चेतसि शुभ्रता तस्य विश्वमिदं अमृतमयमेव ।

7. **एकोदरा एव वयं हि जन्तु-**
**वृन्दानि सर्वाणि जगत्पटेऽस्मिन् ।**
**प्रोतानि चौतानि परस्परेण**
**सुरञ्जितान्येव भवन्ति तानि ॥**

## पदच्छेदः

एकोदरा एव = एकोदरा : + एव ।
जगत्पटेऽस्मिन् = जगत्पटे + अस्मिन् ।
चौतानि = च + ओतानि ।
सुरञ्जितान्येव = सुरञ्जितानि + एव ।

## विग्रहः

जगत्पटः - जगदेव पटः ।
सुरञ्जितम् - सुष्टु रञ्जितम् ।
एकोदराः - एकमेव उदरं यस्य, ते ।
जन्तुवृन्दानि - जन्तूनां वृन्दम्, तानि ।

| अन्वयः | अर्थः |
|---|---|
| अस्मिन् जगत्पटे | - अस्मिन् विश्वरूपे वस्त्रे |
| वयं | - वयं |
| सर्वाणि जन्तुवृन्दानि च | - सर्वाणि जन्तुजालानि च |
| एकोदराः | - सोदराः |
| हि एव | - नूनम् हि |
| ओतानि प्रोतानि च | - वस्त्रनिर्माणे तन्तुविन्यासः इव (ഊടും പാവും) |
| तानि | - तानि एव (जन्तुवृन्दानि) |
| परस्परेण | - मिथः |
| सुरञ्जितानि | - चित्रवर्णाङ्कितानि |
| एव भवन्ति | - वर्तन्ते एव। |

**आशयः**

वयं सर्वे तथा सर्वेऽपि प्राणिनः सोदराः एव अत्र जीवन्ति । अतः वयं सर्वे विश्वरूपे पटे तन्तवः इव समन्विताः भवेम।

8. **येषां दृशः सन्ति न चान्तिकस्था-**
**नालोकितुं स्वाननुजानपीह।**
**स ईश्वरः सर्वगतोऽप्यरूप-**
**स्तेषामदृश्योऽस्ति किमत्र चित्रम् ! ॥**

**पदच्छेदः**

चान्तिकास्थानालोकितुम् = च+ अन्तिकस्थान् +आलोकितुम्।
स्वाननुजानपीह = स्वान् +अनुजान्+ अपि + इह।
सर्वगतोऽप्यरूपस्तेषामदृश्योऽस्ति = सर्वगतः +अपि +अरूपः+ तेषाम् +अदृश्यः +अस्ति।
अपीह = अपि + इह।

| अन्वयः | अर्थः |
|---|---|
| इह | - अत्र |
| अन्तिकस्थान् | - समीपे स्थितान् |
| स्वाननुजान् अपि | - स्वकनिष्ठान् अपि |
| आलोकितुम् | - द्रष्टुम् |
| येषां दृशः | - येषां नेत्राणि |
| न सन्ति | - न वर्तन्ते। |

| | |
|---|---|
| तेषाम् | - तादृशानाम् |
| सर्वगतः अपि | - सर्वान्तर्यामी अपि |
| अरूपः स ईश्वरः | - रूपरहितः सर्वेश्वरः |
| अदृश्यः | - द्रष्टुमसाध्यः |
| अस्ति (चेत्) | - भवति (इति) |
| किमत्र चित्रम् ? | - तत्र किम् आश्चर्यम् ! । |

## भावार्थः

समीपस्थान् स्वसोदरान् अपि यः द्रष्टुं सन्नद्धः न भवति, सः अरूपं सर्वव्यापिणम् ईश्वरं द्रष्टुं न शक्नोति चेत् किमाश्चर्यम् !

9. **सुखं परेषां नियतं सुखं मे**
**दुःखं मदीयं परदुःखमेव ।**
**अहं परो वा परपूरुषो वा**
**भवान् बतैकः परमार्थतोऽस्ति ॥**

## पदच्छेदः

| | | |
|---|---|---|
| बतैकः | - | बत + एकः। |
| परमार्थतोऽस्ति | - | परमार्थतः + अस्ति। |
| परपुरुषो वा | - | परपुरुषः + वा । |

## विग्रहः

मम इदम् - मदीयम्

| अन्वयः | अर्थः |
|---|---|
| परेषां सुखम् | - अन्येषां सुखम् |
| मे नियतं सुखम् | - मम निश्चितं सुखं (भवति ) |
| परदुःखम् | - अन्येषां दुखमेव |
| मदीयं दुःखमेव | - मम दुःखम् |
| अहं परो वा | - अहं भिन्नो वा |
| भवान् परपूरुषो वा | - त्वम् अन्यपुरुषो वा |
| बत | - अहो! |
| परमार्थतः | - यथार्थतः |
| एकः अस्ति | - अभिन्नः भवति। |

**भावार्थः**

परेषां सुखमेव मम सुखं भवति। तेषां दुःखं मम दुःखं च भवति। परमार्थतः अहं परः भवान् च भिन्नः न। यतो हि एक एव आत्मा अस्मासु वर्तते।

## पठनप्रवर्तनानि



**संघे स्थित्वा काव्यं पठित्वा सतालं कक्ष्यायाम् आलपतु।**

**श्रद्धेयाः अंशाः -**

भागभागित्वम्
अर्थावगमनम्
तालालयात्मकत्वम्।



**कैरलीतः संस्कृते अनूदितकाव्यानां चयनं कृत्वा पट्टिकाकरणं करोतु।**

श्रद्धेयाः अंशाः -

अनूदितकाव्यानां परिचायनम्
आशयग्रहणम्
पट्टिकाकरणम्।



**चर्चाद्वारा नूतनपदानां चयनं कृत्वा अर्थान् लिखित्वा शब्दकोशे निवेशयतु।**

**श्रद्धेया अंशाः -**

भागभागित्वम्
अर्थग्रहणम्
शब्दकोशे निवेशनम्।



**संश्लिष्टपदानि चित्वा पदच्छेदं कृत्वा टिप्पणीपुस्तके लिखतु।**

**श्रद्धेया अंशाः-**

संश्लिष्टपदानां चयनम्
पदच्छेदलेखनम्
टिप्पणीपुस्तके लेखनम्।

**पाठभागं पठित्वा चर्चां कृत्वा श्लोकानाम् अन्वयान् लिखतु।**

**श्रद्धेया अंशाः-**

भागभगित्वम्
आशयग्रहणम्
अन्वयलेखनम्।

**पाठभागं पठित्वा चर्चां कृत्वा श्लोकानाम् आशयं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चायां भागभगित्वम्
आशयग्रहणम्
आशयलेखनम्।

**चर्चां कृत्वा कविं काव्यं च अधिकृत्य टिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः -**

चर्चायां भागभगित्वम्
आशयग्रहणम्
टिप्पणीलेखनम्।

**कैरलीकाव्ये संस्कृतपदानां स्वाधीनतामधिकृत्य संगोष्ठीं चालयतु।**

**श्रद्धेया अंशाः -**

चर्चायां भागभगित्वम्
संगोष्ठ्यां भागभागित्वम्
संगोष्ठ्याः आवेदनपत्रलेखनम् ।

## अभ्यासप्रश्नः

**I समुचितमुत्तरं कोष्ठकात् निर्धार्य लिखत।**

1) 'सुखं परेषां नियतं सुखं मे दुःखं मदीयं परदुःखमेव' वाक्यमिदं कस्मिन् काव्ये विद्यते ?

क) करुणा नामके काव्ये　　ख) कुमारसम्भवे
ग) प्रेमसङ्गीते　　घ) रघुवंशे।

2) अस्य प्रपञ्चस्य जीवः कः?

क) प्रेमा | ख) कारुण्यम्
ग) दया | घ) त्यागः ।

3) सुदीपिका कापि हस्ते भवति चेत् विश्वमिदं कीदृशं स्यात् ?

क) प्रभामयम् | ख) तेजोमयम्
ग) समृद्धम् | घ) स्वर्गतुल्यम् ।

4) एन्. गोपालप्पिल्लामहोदयस्य जन्म कस्यां जिल्लायाम् अभवत् ?

क) कोट्टयम् | ख) तिरुवनन्तपुरम्
ग) तृश्शूर् | घ) कोल्लम् ।

5) किं गणे न अन्तर्भवति ?

क) किरातार्जुनीयम् | ख) रघुवंशम्
ग) प्रेमसङ्गीतम् | घ) नैषधीयचरितम् ।

**II प्रस्तावनां कारणं च पठित्वा उचितमुत्तरं चित्वा लिखत ।**

प्रस्तावना - एकोदरा एव वयं हि जन्तुवृन्दानि सर्वाणि ।

कारणम् - सर्वेषां माता एषा भूमिः एव ।

क) प्रस्तावना साधु कारणं साधु
ख) प्रस्तावना असाधु कारणम् असाधु
ग) प्रस्तावना साधु कारणम् असाधु
घ) प्रस्तावना असाधु कारणं साधु ।

**III अधोरेखाङ्कितानाम् समानार्थकपदं मञ्जूषातः चित्वा लिखत ।**

**मधुव्रता** मानसशीतलिम्ने
श्रयन्ति **सूनानि** **मरन्दवन्ति** ।

| |
|---|
| मयूरः, कुसुमानि, पर्णानि, मधुभरितानि, मधुकराः |

# व्याकरणकार्यम्

## क) विभक्तिपठनम् - तृतीयाविभक्तिः ।

തൃതീയാ – തൃതീയാഹേതുവായിട്ട് കൊണ്ട്, ആൽ, ഓട് ഊടെ എന്നപി

| प्रथमाविभक्तिः एकवचनम् | तृतीयाविभक्तिः एकवचनम् |
|---|---|
| बालः | बालेन (ബാലനാൽ) |
| लता | लतया (ലതയാൽ) |
| पुत्री | पुत्र्या (പുത്രിയോട്) |
| वाहनम् | वाहनेन (വാഹനംകൊണ്ട്) |

### वाक्यानि

- बालः *चषकेन* जलं पिबति ।
- सः *वाहनेन* गच्छति ।
- अम्बा *छुरिकया* फलं कर्तयति ।

### श्लोकः

***शशिना*** च निशा ***निशया*** च शशी
***शशिना निशया*** च विभाति नभः ।
***पयसा*** कमलं ***कमलेन*** पयः
***पयसा कमलेन*** विभाति सरः ॥

## ख) भूतकालार्थे लकाराः।

भूतकालार्थे त्रयः लकाराः सन्ति । लिट् ,लङ्, लुङ् च । परोक्षभूतकालार्थे लिट्, अनद्यतनभूतकालार्थे लङ् , सामान्यभूतकालार्थे लुङ् च प्रयुज्यते ।

भू धातोः परस्मैपदी लिट् रूपाणि

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवतुः | बभूवुः |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

# अनुबन्धः

1 ഒരൊറ്റമതമുണ്ടുലകിന്നുയിരാം
പ്രേമമതൊന്നല്ലോ
പരക്കെ നമ്മെപ്പാലമൃതൂട്ടും
പാർവണശശിബിംബം.

2 ഭക്ത്യനുരാഗദയാദി-
വപുസ്സപ്പരാത്മചൈതന്യം
പലമട്ടേന്തിപ്പാരിതിലെങ്ങും
പ്രകാശമരുളുന്നു.

3 അതിന്നൊരരിയാം
നാസ്തിക്യംതാൻ ദ്വേഷം
ലോകത്തിന്നഹോ!
തമസ്സാമതിനടിപെട്ടാലകാലമൃത്യു ഫലം.

4 പദങ്ങളന്വയമാർന്നേ വാക്യം
ഭവിപ്പു സാർത്ഥകമായ്
ശ്രുതിയും താളവുമൊത്തേ
ഗാനം ശ്രോത്രസുഖം നൽകൂ.

5 മധുവ്രതത്തിനു മടുമലർ വേണം
മനം കുളിർപ്പിപ്പാൻ
മലർന്നപൂവിനു വണ്ടും വേണം
മന്നിതു വിണ്ണാക്കാൻ.

6 വിളക്കു കൈവശമുള്ളവനെങ്ങും
വിശ്വം ദീപമയം
വെണ്മ മനസ്സിൽ വിളങ്ങിന ഭദ്രനു
മേന്മേലമൃതമയം.

7 ഏകോദരസോദരർ നാമേവരു-
മെല്ലാജീവികളും
ലോകപടത്തിൽ തമ്മിലിണങ്ങിടു-
മോതപ്രോതങ്ങൾ.

8 അടുത്തു നിൽപ്പോരനുജനെ
നോക്കാനക്ഷികളില്ലാത്തോർ-
ക്കരൂപനീശ്വരനദൃശ്യനായാ-
ലതിലെന്താശ്ചര്യം?

9 പരസുഖമേ സുഖമെനിക്കു നിയതം
പരദുഃഖം ദുഃഖം
പരമാർത്ഥത്തിൽ പരനും ഞാനും
ഭവാനുമൊന്നല്ലീ?

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलेयम् |
|---|---|---|---|
| प्रथितः | प्रशस्तः | പ്രസിദ്ധൻ | famous |
| धर्मः | मतम् | മതം | religion |
| पृथिव्याम् | भूमौ | ഭൂമിയിൽ | on the earth |
| पीयूषः | अमृतम् | അമൃതം | nectar |
| पार्वणेन्दुः | पूर्णचन्द्रः | പൂർണ്ണചന്ദ്രൻ | full moon |
| विष्वक् | समन्तात् | ചുറ്റും | around |
| मधुव्रतः | मधुकरः | തേനീച്ച | honey bee |
| भृङ्गः | भ्रमरः | വണ്ട് | beetle |
| अन्तिकः | समीपस्थः | അടുത്തുള്ളവൻ | the nearest one |

स्थायिभावो हि दाम्पत्ये
आजीवं स्नेहपूर्णिमा ।

# 4 स्वप्नाङ्कम्



**पाठप्रवेशः**

आङ्गिकं वाचिकं चैवाहार्यं सात्त्विकं तथा ।
चतुर्विधोऽभिनयः प्रोक्तो नाट्यशास्त्रविशारदैः ॥

## आमुखम्

संस्कृतनाटककर्तृषु अन्यतमो भवति महाकविः भासः। त्रयोदशरूपकाणि भासविरचितानि इति साहित्यचरितज्ञाः आमनन्ति । डा. टि. गणपतिशास्त्रिणा समाकलितानि तानि भासनाटकचक्रमिति व्यपदिश्यन्ते। तस्य त्रयोदशनाटकेषु षडङ्कयुक्तं स्वप्नवासवदत्तम् अतीव श्रेष्ठमिति मन्यते । नाटकस्य पञ्चमाङ्के प्रतिपाद्यमानं स्वप्नवृत्तान्तमधिकृत्यैव स्वप्नवासवदत्तमिति नाम स्वीकृतम्। तं सन्दर्भम् अत्र पठामः।

## इतःपर्यन्ता कथा

वासवदत्ता-उदयनयोः कथा भवति स्वप्नवासवदत्तम् । भासेन विरचिते नाटकेऽस्मिन् स्वराज्यसंरक्षणार्थं मगधराजकुमारीं पद्मावतीम् उदयनेन विवाहं कारयितुं प्रधानसचिवः यौगन्धरायणः यतते। वासवदत्ता यौगन्धरायणः च अग्निना दग्धौ इति कथामपि रुमण्वमुखेन प्रसारयति। तच्छ्रुत्वा दुःखितोऽपि राजा कालान्तरे पद्मावतीं भार्यापदे स्वीकरोति। तथापि सः वासवदत्तां सर्वदा मनसि निधाय जीवति। वासवदत्ता अवन्तिका इति नाम्ना पद्मावत्याः अन्तःपुरे वसति। एकदा समुद्रगृहके पद्मावतीं प्रतीक्ष्य शयानः उदयनः निद्राति। तत्र वासवदत्ता पद्मावतीं अन्विषन्ती प्रविशति। पञ्चमाङ्के प्रतिपादितं सन्दर्भमवलम्ब्य पाठभागोऽयं कल्पितः।

### कथापात्राणि

| | | | |
|---|---|---|---|
| राजा | - वत्सराजः उदयनः (नायकः) | अवन्तिका | - वासवदत्ता (नायिका) |
| विदूषकः | - नायकस्य मित्रम् | चेटी | - पद्मावत्याः सखी |

(चेटी वासवदत्ता च प्रविशतः)

चेटी - एत्त्वेत्वार्या। दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता।

वासवदत्ता - हा धिक्, कुत्र शयनीयं रचितं पद्मावत्याः?

चेटी - समुद्रगृहके किल शय्यास्तीर्णा।

वासवदत्ता - तेन ह्यग्रतो याहि। (उभे परिक्रामतः)

चेटी - इदं समुद्रगृहकम्। प्रविशत्वार्या, यावदहमपि शीर्षानुलेपनं त्वरयामि।

(निष्क्रान्ता)

वासवदत्ता - अहो अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रामस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत् प्रविशामि। (प्रविश्यावलोक्य) अहो परिजनस्य प्रमादः। अस्वस्था पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदहमुपविशामि। (उपविश्य) अथवा अन्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति। तदस्यां शय्यायामुपविशामि। किं नु खल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम्। दिष्ट्याविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवा एकदेशसंविभागतया शयनीयस्य सूचयति मामालिङ्गेति। यावच्छयिष्ये। (शयनं नाटयति)

राजा - (स्वप्नायते) हा वासवदत्ते !

वासवदत्ता - (सहसोत्थाय) हम्, आर्यपुत्रः न खलु पद्मावती। किं नु खलु दृष्टास्मि? महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः।



राजा - हा अवन्तिराजपुत्रि !

वासवदत्ता - दिष्ट्या स्वप्नायते खल्वार्यपुत्रः । नात्र कश्चिज्जनः। यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि।

राजा - हा प्रिये ! हा प्रियशिष्ये! देहि मे प्रतिवचनम् ।

वासवदत्ता - आलपामि भर्तः, आलपामि ।

राजा - किं कुपितासि ?

वासवदत्तः - नहि नहि, दुःखितास्मि ।

राजा - यद्यकुपिता किमर्थं नालंकृतासि ?

वासवदत्ता - इतः परं किम् ?

राजा - किं विरचिकां स्मरसि?

वासवदत्ता - (सरोषम्) आ अपेहि, इहापि विरचिका ।

राजा - तेन हि विरचिकार्थं भवतीं प्रसादयामि। (हस्तौ प्रसारयति)

वासवदत्ता - चिरं स्थितास्मि । कोऽपि मां पश्येत्। तद् गमिष्यामि। अथवा, शय्याप्रलम्बितमार्यपुत्रस्य हस्तं शयनीये आरोप्य गमिष्यामि ।

[तथा कृत्वा निष्क्रान्ता]

राजा - (सहसोत्थाय) वासवदत्ते ! तिष्ठ तिष्ठ । हा धिक् !

निष्क्रामन्संभ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः ॥ 1॥

विदूषकः - (प्रविश्य) अयि, प्रतिबुद्धोऽत्र भवान् ।

राजा - वयस्य, प्रियमावेदये। धरते खलु वासवदत्ता।

विदूषकः - अविधा वासवदत्ता। कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।

राजा - वयस्य ! मा मैवम् ।

शय्यायामवसुप्तं मां बोधयित्वा सखे गता ।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥ 2 ॥

विदूषकः - अविधा, असंभावनीयमेतन्न । आ! उदकस्नानसङ्कीर्तनेन तत्र भवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।

राजा - एवं, मया स्वप्नो दृष्टः।

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम् ।
यथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम् ॥ 3 ॥

विदूषकः - मेदानीं भवान् आत्मानमवहसितं कर्तुम् । किन्तु अस्मिन् राजकुलेऽवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति। सा त्वया दृष्टा भवेत् ।

राजा - न, न

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ 4॥

अपि च वयस्य, पश्य पश्य ।

योऽयं संत्रस्तया देव्या तया बाहुर्निपीडितः।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥ 5 ॥

विदूषकः - मेदानीं भवाननर्थं चिन्तयित्वा । एत्वेतु भवान्। चतुश्शालं प्रविशावः।

(सर्वे निष्क्रान्ताः।)

## पदच्छेद :

ह्यग्रतः = हि + अग्रतः ।
ह्यस्तु = हि + अस्तु ।
प्रविशत्वार्या = प्रविशतु + आर्या ।
जयत्वार्यपुत्रः = जयतु + आर्यपुत्रः ।

दृष्टास्मि = दृष्टा + अस्मि ।
दुःखितास्मि = दुःखिता + अस्मि ।
वञ्चितोऽस्मि = वञ्चितः +अस्मि ।
तावदयं = तावत् + अयम् ।
अथायं = अथ +अयम् ।
कुपितासि = कुपिता +असि ।
नालंकृतासि = न +अलंकृता + असि ।
स्वप्नस्यान्ते = स्वप्नस्य +अन्ते ।
वत्साश्च = वत्साः + च ।
दग्धेति = दग्धा +इति ।
संभ्रमेणाहम् = संभ्रमेण + अहम् ।
इहापि = इह +अपि ।
कश्चिज्जनः = कश्चित् + जनः ।
तन्मयानुष्ठितम् =तत् + मया + अनुष्ठितम् ।

## विग्रहः

अकरुणाः - अविद्यमाना करुणा यस्य सः अकरुणः, ते ।
विश्रामस्थानभूता - विश्रामस्य स्थानं विश्रामस्थानम् , विश्रामस्थानम् एव भूता ।
दीपसहायाम् - दीप एव सहायः यस्याः सा दीपसहाया, तां दीपसहायाम्।
शयनीयम् - शयनाय इदम् ।
भूतार्थः - भूतः अर्थः यस्य सः ।
रोमहर्षम् - रोम्णा हर्षः रोमहर्षः, तम् ।

## अन्वयः

**1) निष्क्रामन् सम्भ्रमेणाहं ...**

अहं सम्भ्रमेण, निष्क्रामन् द्वारपक्षेण ताडितः। ततः अयम् भूतार्थः , मनोरथः, ( इति) व्यक्तं न जानामि ॥

**भावार्थः** - अहम् उदयनः स्वप्ने दृष्टा वासवदत्ता अन्या वेति संशयात् बहिः धावितवान् । तदा मम शिरः द्वारपार्श्वे प्रतिहतम् । तस्मात् कारणात् वासवदत्तासमागमः सत्यं काल्पनिकं वा इति व्यक्तं न जानामि ।

अत्र 'अनुष्टुप्' वृत्तम् ।

**2) शय्यायामवसुप्तं...**

सखे शय्यायाम् अवसुप्तं मां बोधयित्वा गता । पूर्वं दग्धा इति ब्रुवता रुमण्वता वञ्चितः अस्मि।

**भावार्थः** - सखे वसन्तक, ( विदूषक) इदानीं शय्यायां गाढं प्रसुप्तं मां निजकरस्पर्शेन सौख्यप्रदानद्वारा प्रबुद्धं कृत्वा सा (वासवदता) मत्समीपात् निर्गता । पुरा ग्रामदाहेन साऽपि दग्धा इति वृथाभाषमाणेन मन्त्रिणा रुमण्वता नूनम् अहं प्रतारितः अस्मि ।

अत्र 'अनुष्टुप्' वृत्तम् ।

**3) यदि तावदयं स्वप्नो...**

यदि तावत् अयं स्वप्नः (तर्हि) अप्रतिबोधनम् धन्यम् । अथ अयं विभ्रमो वा स्यात् (तर्हि) मे विभ्रमो हि चिरम् अस्तु ।

**भावार्थः** - सखे वसन्तक, यदि वासवदत्तायाः दर्शनं स्वप्नः एव अस्ति तर्हि अहं धन्यः अस्मि । मम जागरणं मा भूयात् । यदि पुनरयं केवलो विभ्रमो माया वा, तर्हि सः दीर्घकालं मम अस्तु।

अत्र 'अनुष्टुप्' वृत्तम् ।

**4) स्वप्नस्यान्ते विबुद्धेन...**

स्वप्नस्य अन्ते विबुद्धेन मया चारित्रं रक्षन्त्याः (तस्याः) नेत्रविप्रोषिताञ्जनं दीर्घालकं मुखम् अपि दृष्टम् ।

**भावार्थः** - स्वप्नस्य अन्ते जागरितेन मया, स्वप्नेऽपि चारित्र्यं रक्षन्त्याः वासवदत्तायाः अश्रुभिः विगताञ्जनं शिथिलालकं मुखकमलं दृष्टम् ।

अत्र 'अनुष्टुप्' वृत्तम् ।

**5) योऽयं सन्त्रस्तया...**

सन्त्रस्तया तया देव्या निपीडितः, स्वप्ने अपि उत्पन्नसंस्पर्शः यः अयं बाहुः रोमहर्षं न मुञ्चति ।

**भावार्थः** - मत्प्रतिबोधनभीतया वासवदत्तया तल्पे स्थापनाय स्वकरेण मन्दगृहीतः मम भुजः स्वप्नावस्थायामपि वासवदत्ताकरग्रहेण सञ्जातं रोमाञ्चं इदानीमपि न त्यजति ।

अत्र 'अनुष्टुप्' वृत्तम् ।

## पठनप्रवर्तनानि

**आमुखम् अनुबन्धं च पठित्वा टि गणपतिशास्त्रिमहोदयस्य योगदानमधिकृत्य लघूपन्यासं लिखतु ।**

**श्रद्धेयाः अंशाः -**

निर्दिष्टांशस्य पठनम्
चर्चाचालनम्
उपन्यासलेखनम् ।

**दशरूपकाणि अधिकृत्य संघचर्चां कृत्वा क्रोडीकृत्य टिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः -**

चर्चाचालनम्
आशयापग्रथनम्
क्रोडीकृत्य लेखनम् ।

**नाटकलक्षणम् अधिकृत्य संघचर्चां कृत्वा लघूपन्यासं लिखतु ।**

**श्रद्धेयाः अंशाः -**

चर्चाचालनम्
आशयापग्रथनम्
क्रोडीकृत्य लेखनम् ।

**नाटकमिदं कक्ष्यायाम् अवतारयतु ।**

**श्रद्धेयाः अंशाः -**

चर्चाचालनम्
परिशीलनम्
अवतरणम् ।

**नाटकांशं पठित्वा आशयं कथारूपेण परिवर्त्य लिखतु ।**

**श्रद्धेयाः अंशाः -**

रूपकापग्रथनम्
कथारूपेण परिवर्तनम्
कथालेखनम् ।

**भासनाटकचक्रमधिकृत्य संघचर्चां कृत्वा पट्टिकां रचयतु ।**

**श्रद्धेयाः अंशाः -**

निर्दिष्टांशस्य पठनम्

संघचर्चा

पट्टिकारचना ।

## अभ्यासप्रश्नाः

1. पाठम् अनुबन्धं च पठित्वा अधोदत्तेषु विभिन्नगणः कः इति चित्वा लिखतु ।

| | |
|---|---|
| i) स्वप्नवासवदत्तम् | - क) उदयनकथाश्रितम् |
| ii) प्रतिमानाटकम् | - ख) महाभारतम् |
| iii) दूतवाक्यम् | - ग) लोकाश्रितम् |
| iv) अविमारकम् | - घ) रामायणम् |

1) i-क, ii - ग, iii-ख, iv-घ

2) i- क, ii - घ, iii-ख, iv-ग

3) i- ग, ii-घ, iii-क, iv-ख

4) i- घ, ii-ख, iii-ग, iv-क

2. अनुचितं गणं चित्वा लिखतु ।

क) रामायणाश्रिते - अभिषेकनाटकम्, प्रतिमानाटकम् ।

ख) लोकाश्रितानि - अविमारकम्, कर्णभारम्, दरिद्रचारुदत्तम् ।

ग) महाभारताश्रितानि - कर्णभारम्, मध्यमव्यायोगः, ऊरुभङ्गम् ।

3. पट्टिकां पठित्वा उचितं गणं लिखतु ।

| | |
|---|---|
| i) रामायणम् | - क) पञ्चरात्रम् |
| ii) महाभारतम् | - ख) अविमारकम् |
| iii) लोकाश्रितम् | - ग) अभिषेकनाटकम् |
| iv) उदयनकथाश्रितम् | - घ) स्वप्नवासवदत्तम् |

1) i - ग, ii -क, iii- घ, iv - ख

2) i - ग, ii - क, iii - ख, iv - घ

3) i - क, ii - ख, iii- ग, iv - घ

4) i - क, ii - घ, iii - ख, i v - ग

4. अधोदत्तेषु उचिता प्रस्तावना का ?

क) स्वप्नवासवदत्तम् महाकवेः भासस्य अनश्वरं नाटकं भवति।

ख) भासनाटकचक्रे विद्यमानेषु नाटकेषु अतीव विशिष्टं भवति स्वप्नवासदत्तम्।

1) क - साधु

2) ख - साधु

3) उभयमपि साधु

4) उभयमपि असाधु

## व्याकरणकार्यम्

### क) विभक्तिपाठनम् – चतुर्थीविभक्तिः।

(ആയിക്കൊണ്ട് ചതുർത്ഥി ച)

### पदानि

पुत्रः - पुत्राय।

लता - लतायै।

पुत्री - पुत्र्यै।

वनम् - वनाय।

### वाक्यानि

- पिता ***पुत्राय*** धनं ददाति।
- यमुना ***लतायै*** पुस्तकं ददाति।
- माता ***पुत्र्यै*** क्षीरं ददाति।
- युवकः ***धनाय*** कर्म करोति।
- ***आचार्याय*** नमः।

### श्लोकः

विद्या ***विवादाय*** धनं ***मदाय***
शक्तिः परेषां ***परिपीडनाय***।
खलस्य साधोर्विपरीतमेतत्
***ज्ञानाय दानाय*** च ***रक्षणाय*** ॥

### ख) क्रियापदपठनम् - लकारः।

भविष्यत्कालार्थे लकाराः।

भविष्यत्कालार्थे द्वौ लकारौ स्तः । लुट्, लृट् च । लुट् अनद्यतनभविष्यत्काले । लृट् सामान्यभविष्यत्कालार्थे ।

**गम्ल् गतौ धातोः लृट् परस्मैपदरूपाणि ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः । |

## अनुबन्धः

### भासः

भासनाटकचक्रे विद्यमानेषु त्रयोदशनाटकेषु अतीव विशिष्टं भवति स्वप्नवासवदत्तम् । कविकुलगुरुः कालिदासः तस्य मालविकाग्निमित्रमिति नाटकस्य प्रारम्भे भासमधिकृत्य आदरं प्रकटयति । तेन च परामर्शेन कालिदासादपि प्राक्तनः भवत्ययं महाकविरिति अनुमातुं शक्यते । तस्य जीवनकालः क्रिस्तोः पूर्वं चतुर्थशतकम् इति केचन अभिप्रयन्ति । स्वप्नवासवदत्तस्य पञ्चमे अङ्के स्वप्नम् अधिकृत्य चारु वर्णनं दृश्यते । तदधिकृत्यैव नाटकस्यास्य स्वप्नवासवदत्तमिति नाम दत्तमिति कथ्यते ।

### भासनाटकचक्रम् ।

| | |
|---|---|
| रामायणकथाश्रिते | अभिषेकनाटकम् |
| | प्रतिमानाटकम् |
| महाभारतकथाश्रितानि | कर्णभारम् |
| | मध्यमव्यायोगः |
| | ऊरुभङ्गम् |
| | पञ्चरात्रम् |
| | दूतघटोत्कचम् |
| | दूतवाक्यम् |
| भागवतकथाश्रितम् | बालचरितम् |
| उदयनकथाश्रिते | प्रतिज्ञायौगन्धरायणम् |
| | स्वप्नवासवदत्तम् |
| लोककथाश्रिते | अविमारकम् |
| | दरिद्रचारुदत्तम् |

### दशरूपकाणि

नाटकं सप्रकरणमङ्को व्यायोग एव च ।
भाण : समवकारश्च वीथी प्रहसनं डिमः ॥
ईहामृगञ्च विज्ञेयं दशमं नाट्यलक्षणम् ॥

### नाटकलक्षणम्

प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकञ्चैव ।
राजर्षिवंशचरितं तथा च दिव्याश्रयोपेतम् ॥
नानाविभूतिसंयुतमृद्धिविलासादिभिर्गुणैश्चापि ।
अङ्कप्रवेशकाख्यं भवति हि तन्नाटकं नाम।
नृपतीनां यच्चरितं नानारसभावचेष्टितैर्बहुधा ॥

### नाटकसङ्केताः -

#### १) नान्दी

आर्शीवचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥

#### २) सूत्रधारः

आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः ।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः ॥

#### ३) स्थापना

सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥

#### ४) विदूषकः

विकृताङ्गवचो वेषैर्हास्यकारी विदूषकः ।

#### ५) काञ्चुकीयः

अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः ।
स्वकार्यार्थकुशलः काञ्चुकीत्यभिधीयते ॥

६) स्वगतम् (आत्मगतम् )

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।

७) प्रकाशम्

सर्वश्राव्यं प्रकाशं स्यात् ॥

**भासनाटकचक्रेऽस्मिन् छेकैः क्षिप्ते परीक्षितुम् ।**
**स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥**

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलेयम् |
|---|---|---|---|
| शीर्षवेदना | शिरोवेदना | തലവേദന | headache |
| समुद्रगृहकम् | समुद्रतीरे विद्यमानं विश्रमकेन्द्रम् | സമുദ്രതീരത്തുള്ള വിശ്രമകേന്ദ്രം | resting place on sea shore |
| प्रह्लादितम् | सञ्जाततोषम् | സന്തോഷിക്കപ്പെട്ടത് | delighted by |
| दिष्ट्या | भाग्यवशात् | വിധിവശാൽ | by destiny |
| मुहूर्त्तकम् | क्षणमात्रम् | അൽപ്പനേരം | just a moment |
| प्रतिबुद्धः | जागरितः | ഉണർത്തപ്പെട്ടവൻ | awakened |
| उपरता | मृता | മരണപ്പെട്ടവൾ | dead |
| शय्यायाम् | तल्पे | കിടക്കയിൽ | on the Bed |
| चारित्रम् | सौशील्यम् | സത്സ്വഭാവം | chastity |
| दीर्घालकम् | चूर्णकुन्तलम् | കുറുനിരയുള്ള | curly haired |
| विप्रोषिताञ्जनम् | कज्जलरहितम् | കൺമഷി ഇല്ലാത്ത | faded kajal |

अतिगाढस्य रागस्य
सायुज्यं परमं फलम् ।



# 5 सम्बन्धाः सदनुष्ठिताः

**पाठप्रवेशः**

**चर्चासूचकाः –**

- सप्तर्षयः किमर्थम् आगच्छन् ?
- ते कं प्रति संवादमकुर्वन् ?
- का लीलाकमलपत्राणि गणयामास ?

## आमुखम्

साहित्यं दृश्य-श्रव्यभेदेन द्विधा भवति। श्रव्यकाव्यं गद्यं पद्यं मिश्रं चेति त्रिविधम्। संस्कृतसाहित्ये प्रसिद्धानि पञ्चमहाकाव्यानि सन्ति। तानि कालिदासस्य रघुवंशम्, कुमारसंभवम्, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम् (माघम्), श्रीहर्षस्य नैषधीयचरितम् (नैषधम्) च।

कुमारस्य (सुब्रह्मण्यस्य) उद्भवमधिकृत्य कृतं काव्यं भवति कुमारसंभवम्। काव्यस्यास्य कथाबीजं पद्मपुराणस्य सृष्टिकाण्डात् स्वीकृतम्। काव्येऽस्मिन् अष्ट सर्गास्सन्ति। किन्तु सप्तदशसर्गाः सन्तीति केचिन्मन्यन्ते। अस्मिन् महाकाव्ये हिमवद्वृत्तान्तः, तारकासुरविचेष्टितानि, सतीवियोगात् जाता शिवस्य वैराग्यावस्था, कामदहनं, रतिविलापः, पार्वत्याः तपः, ब्रह्मचारिकृतप्रेमपरीक्षा, सप्तर्षिकृतवधूयाचना, शिवपार्वत्योः विवाहः, कुमारोदयसूचना च क्रमशः वर्ण्यन्ते। सप्तर्षिकृतवधूयाचना विवाहनिश्चयः च कुमारसंभवस्य षष्टसर्गे उपवर्णितौ। अस्मात् सर्गात् समाकलितं भागं पाठेऽस्मिन् पठामः।

परमेश्वरः स्वस्य विवाहनिश्चयार्थं सप्तर्षीन् स्मरति। सद्यैव ते परमेश्वरस्य पुरतः प्रादुरभवन्। "वयं किं करवाम"? -इति प्रश्नस्य प्रतिवचनमेवात्र सन्दर्भः।

1. **अथ मौलिगतस्येन्दो-**
**र्विशदैर्दशनांशुभिः।**
**उपचिन्वन्प्रभां तन्वीं**
**प्रत्याह परमेश्वरः॥**

### पदच्छेदः

मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः = मौलिगतस्य + इन्दोः + विशदैः + दशनांशुभिः।

### विग्रहः

दशनांशुभिः - दशनानाम् अंशवः येषु तैः।
परमेश्वरः - परमः च असौ ईश्वरः च।

| अन्वयः | अर्थः |
|---|---|
| अथ | - अनन्तरम्। |
| परमेश्वरः | - शिवः |
| विशदैः | - शुभ्रैः |
| दशनांशुभिः | - दन्तकान्तिभिः |
| मौलिगतस्य | - शिरोगतस्य |
| इन्दोः | - चन्द्रस्य |
| तन्वीं | - लघ्वीं |
| प्रभाम् | - शोभां |
| उपचिन्वन् | - वर्धयन् |
| प्रत्याह | - प्रत्युवाच ॥ |

## भावार्थः

अनन्तरं परमेश्वरःशुभ्रांशुभिः दन्तकान्तिभिः शिरोगतस्य चन्द्रस्य लघ्वीं शोभां वर्धयन् सप्तर्षीन् प्रति अवदत् ॥

युष्माभिः मम कृते पार्वती याचनीया इति।

2. **तामस्मदर्थे युष्माभि-**
**र्याचितव्यो हिमालयः।**
**विक्रियायै न कल्पन्ते**
**संबन्धाः सदनुष्ठिताः ॥**

## पदच्छेदः

युष्माभिर्याचितव्यः = युष्माभिः+ याचितव्यः ।

याचितव्यो हिमालयः = याचितव्यः + हिमालयः।

## विग्रहः

हिमालयः - हिमस्य आलयः।

सदनुष्ठिताः - सद्भिः अनुष्ठिताः।

| अन्वयः | अर्थः |
|---|---|
| हिमालयः | - हिमवान् |
| युष्माभिः | - भवद्भिः |

| | |
|---|---|
| ताम् | - पार्वतीं |
| अस्मदर्थे | - मम कृते |
| याचितव्यः | - अपेक्षणीयः |
| सदनुष्ठिताः | - सज्जनैः कृताः |
| संबन्धाः | - परस्परबन्धाः |
| विक्रियायै | - विनोदाय |
| न कल्पन्ते | - न भवन्ति। |

**भावार्थः**

भवन्तः मदर्थं हिमालयं पार्वतीं याचयन्तु। सद्भि अनुष्ठिताः संबन्धाः गौरवाय भविष्यन्ति ॥

मुनयः मनोवेगेन ओषधिप्रस्थं आसेदुः-

3. **ते चाकाशमसिश्याम-**
**मुत्पत्य परमर्षयः।**
**आसेदुरोषधिप्रस्थं**
**मनसा समरंहसः ॥**

**पदच्छेदः**

| | |
|---|---|
| चाकाशमसिश्यामम् | = च + आकाशम् + असिश्यामम् । |
| आसेदुरोषधिप्रस्थम् | = आसेदुः+ ओषधिप्रस्थम्। |

**विग्रहः**

| | |
|---|---|
| परमर्षयः | - परमः च असौ ऋषिः च, ते। |
| ओषधिप्रस्थं | - ओषधिबहुलं प्रस्थम्। |

| अन्वयः | अर्थः |
|---|---|
| ते परमर्षयः च | - ते महर्षयः च |
| असिश्यामम् | - खड्गवन्नीलम् |
| आकाशम् | - अम्बरम् |
| उत्पत्य | - उद्गम्य |
| मनसा समरंहसः | - मनोवेगेन |
| ओषधिप्रस्थं | - हिमवत्पुरम् |
| आसेदुः | - प्रापुः। |

**भावार्थः**

ते ऋषयःअसिवत् श्याममयम् आकाशम् उत्पत्य मनोवेगेन हिमवत्पुरं प्रापुः ।

हिमवान् तान् ऋषीन् स्वीचकार -

4. **तानर्घ्यानर्घ्यमादाय**
**दूरात्प्रत्युद्ययौ गिरिः।**
**नमयन्सारगुरुभिः**
**पदन्यासैर्वसुन्धराम् ॥**

**पदच्छेदः**

तानर्घ्यानर्घ्यमादाय = तान् + अर्घ्यान् + अर्घ्यम्+ आदाय ।
पदन्यासैर्वसुन्धराम् = पदन्यासैः + वसुन्धराम् ।

**विग्रहः**

वसुन्धरा - वसून् धरति इति ।
सारगुरुभिः - सारैः गुरुभिः ।



| **अन्वयः** | **अर्थः** |
|---|---|
| गिरिः | - पर्वतः |
| अर्घ्यान् तान् | - पूज्यार्हान् तान् मुनीन् |
| अर्घ्यम् आदाय | - अर्घ्यार्थं जलमादाय |
| सारगुरुभिः | - अन्तस्सारनिभरैः |
| पादन्यासैः | - पादक्षेपैः |
| वसुन्धरां | - भूमिम् |
| नमयन् | - अधः कुर्वन् |
| दूरात्प्रत्युद्ययौ | - दूरात् प्रत्युज्जगाम । |

**भावार्थः**

स हिमालयः सारवद्भिः गुरुभिः पादपतनैः भुवम् अधः कुर्वन् तान् पूज्यान् ऋषीन् अर्घ्यैः प्रत्युज्जगाम ।

मुनयः तेषां आगमनकार्यम् अवदन् -

5. **तदागमनकार्यं नः**
**शृणु कार्यं तवैव तत्।**
**श्रेयसामुपदेशात्तु**
**वयमत्रांशभागिनः॥**



**पदच्छेदः**

| | |
|---|---|
| तदागमनकार्यं | = तत् + आगमनकार्यम्। |
| तवैव | = तव + एव |
| श्रेयसामुपदेशात्तु | = श्रेयसाम् + उपदेशात् + तु। |

**विग्रहः**

अंशभागिनः - अंशं भजन्ते इति ।

| अन्वयः | अर्थः |
|---|---|
| तत् | - शिवाभ्यर्थनहेतोः |
| नः | - अस्माकम् |
| आगमनकार्यं | - आगमनस्य कार्यम् |
| शृणु | - श्रूयताम्। |
| तत् | - तत् (कार्यं) |
| तव एव कार्यं | - हिमवतःकार्यम् एव |
| वयं तु | - वयं सप्तर्षयः तु। |
| श्रेयसाम् उपदेशात् | - ऐश्वर्योपदेशात् एव। |
| अत्र अंशभागिनः | - अस्मिन्कार्ये भागभागिनः। |

**भावार्थः**

सप्तर्षयः आगमनकार्यम् वक्तुमारभन्त। ते वदन्ति यत् वस्तुतः कार्यमिदं हिमवतः एव भवति। सप्तर्षयः तु महादेवस्य निर्देशात् कार्येऽस्मिन् भागभाजः अभवन् इति।

शिवेन यदुक्तं तत् वदामः -

**6. स ते दुहितरं साक्षा -**
**त्साक्षी विश्वस्य कर्मणाम् ।**
**वृणुते वरदः शंभु-**
**रस्मत्संक्रामितैः पदैः॥**

## पदच्छेदः

शंभुरस्मत्संक्रामितैः = शंभुः + अस्मत्संक्रामितैः

## विग्रहः

| | |
|---|---|
| साक्षी | - साक्षात् ईक्षते इति । |
| अस्मत्संक्रामितैः | - अस्मासु संक्रामितैः । |
| वरदः | - वरं ददाति इति । |

| अन्वयः | अर्थः |
|---|---|
| विश्वस्य | - जगतः |
| कर्मणां साक्षी | - प्रवृत्तीनां द्रष्टा |
| वरदः | - अभीष्टदायकः |
| स शंभुः | - पूर्वोक्तः शिवः |
| ते दुहितरम् | - तव प्रियपुत्रीम् |
| अस्मत्संक्रामितैः पदैः | - अस्मद् द्वारा प्रेषितैः वाक्यैः |
| साक्षात् वृणुते | - साक्षात् याचते । |

## भावार्थः

जगतः सर्वकर्मणां साक्षी तथा वरप्रदाता च भवति शिवः । तस्य कृते तव प्रियपुत्रीं पार्वतीम् अस्मासु नियुक्तैः वाक्यैः साक्षात् याचते ।

शंभोः वाचः अहं वदामि -

**7. तमर्थमिव भारत्या**
**सुतया योक्तुमर्हसि**
**अशोच्या हि पितुः कन्या**
**सद्भर्तृप्रतिपादिता ॥**

**विग्रहः**

अशोच्या - शोचितुम् अर्हा शोच्या, न शोच्या।

| अन्वयः | अर्थः |
|---|---|
| भारत्या | - वाचा |
| अर्थम् इव | - अभिधेयम् इव |
| सुतया | - दुहित्रा |
| तम् | - शंभुं |
| योक्तुम् | - संघटयितुं |
| अर्हसि | - त्वम् अर्हसि |
| हि | - यतः |
| सद्भर्तृप्रतिपादिता | - उत्तमभर्त्रे समर्पिता |
| कन्या | - पुत्री |
| पितुः | - जनकस्य (हिमवतः) |
| अशोच्या | - न दुःखावहा भवति। |

**भावार्थः**

वाचा अर्थम् इव तव तनयया सह शम्भुं योक्तुं त्वं प्रभवसि। यस्मात् (वाचा अर्थस्य इव शिवपार्वत्योः नित्ययोगे विवक्षिते) उत्तमभर्तरि समर्पिता कन्या जनकाय शोकहेतुः कदापि न भवति।

अयं सम्बन्धः कुलोत्कर्षाय भवतीति प्रतिपादयति -

**8. उमा वधूर्भवान्दाता**
**याचितार इमे वयम्।**
**वरः शम्भुरलं ह्येष**
**त्वत्कुलोद्भूतये विधिः ॥**

**पदच्छेदः**

वधूर्भवान् = वधूः+ भवान्।
याचितार इमे = याचितारः + इमे।
शम्भुरलं = शंभुः + अलम्
ह्येषः = हि + एषः।

**विग्रहः**

त्वत्कुलोद्भूतये - कुलस्य उद्भूतिः कुलोद्भूतिः, तव कुलोद्भूतिः, त्वत्कुलोद्भूतिः, तस्यै।

| अन्वयः | अर्थः |
| --- | --- |
| उमा वधूः | - पार्वती एव वधूः |
| भवान् दाता | - भवानेव दाता |
| इमे वयं याचितारः | - वयं सप्तर्षयः प्रार्थकाः |
| शंभुः वरः | - शिवः एव विवाहार्थी |
| एष विधिः | - एषः विधिः |
| त्वत्कुलोद्भूतये | - तव कुलस्य ऐश्वर्याय |
| अलं हि | - पर्याप्तः हि । |

### भावार्थः

पार्वती वधूः, भवान् दाता, वयं तु प्रार्थकाः, शिवः वरः, तयोः संबन्धः तव श्रेयस्करः भविष्यति।

### व्याकरणविशेषः

कुलोद्भूतये अलम् - पर्याप्त्यर्थस्य अलं शब्दस्य योगे चतुर्थी ।

मुनेः वचनानि श्रुत्वा पार्वती लीलाकमलपत्राणि गणयामास -

9. **एवं वादिनि देवर्षौ**
**पार्श्वे पितुरधोमुखी ।**
**लीलाकमलपत्राणि**
**गणयामास पार्वती ।।**



### पदच्छेदः

पितुरधोमुखी = पितुः+ अधोमुखी ।

### विग्रहः

पार्वती - पर्वतस्य अपत्यं स्त्रीः।
देवर्षौ - देवश्च असौ ऋषिः च देवर्षिः, तस्मिन् ।
लीलाकमलपत्राणि - लीलार्थं कमलम्, तस्य पत्राणि ।

| अन्वयः | अर्थः |
| --- | --- |
| देवर्षौ | - देवर्षौ अङ्गिरसि |
| एवं वादिनि | - एवं वदति सति |
| पार्वती | - उमा |
| पितुः पार्श्वे | - हिमवतः समीपे |
| अधोमुखी | - नम्रमुखी भूत्वा |

लीलाकमलपत्राणि - लीलाकमलदलानि

गणयामास - गणयति स्म ।

**भावार्थः**

देवर्षौ एवं विधाभिप्रायं प्रकटयति सति पार्वती पितुः समीपे अधोमुखी भूत्वा लीलाकमलदलानि गणयामास ।

## पठनप्रवर्तनानि

**छात्राः संघे स्थित्वा चर्चां कृत्वा पाठभागस्य अन्वयं भावार्थं च रचयन्तु ।**

**श्रद्धेयाः अंशाः -**

चर्चायां भागभागित्वम्

आशयग्रहणम्

अन्वयस्य भावार्थस्य च रचना ।

**छात्राः संघे स्थित्वा संस्कृतसाहित्ये पञ्चमहाकाव्यानां स्थानमधिकृत्य संवादं कृत्वा निर्दिष्टाभ्यासं रचयन्तु ।**

**श्रद्धेयाः अंशाः -**

संवादे भागभगित्वम् ।

आशयग्रहणम् ।

निर्दिष्टाभ्यासस्य रचना ।

**पाठभागं व्याख्यानं च पठित्वा तृतीयाविभक्त्यन्तपदानि वाक्यानि च चित्वा लिखतु ।**

**श्रद्धेयाः अंशाः -**

आशयग्रहणम्

पदरचना

वाक्यरचना ।

**पाठभागं पठित्वा प्रश्नानाम् उत्तराणि लिखतु ।**

**श्रद्धेयौ अंशौ -**

आशयग्रहणम्

उत्तरलेखनम् ।

**पाठभागं व्याख्यानं च पठित्वा कविं काव्यं च अधिकृत्य टिप्पणीं लिखतु।**

**श्रद्धेयौ अंशौ -**

आशयग्रहणम्

टिप्पणीलेखनम्।

**चर्चां कृत्वा भूतकालार्थकपदानि चित्वा लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चायां भागभागित्वम्

आशयग्रहणम्

आस्वादनटीकालेखनम्।

**पाठभागं पठित्वा चर्चां कृत्वा श्लोकस्य पाठभागस्य वा आस्वादनटीकां लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चायां भागभागित्वम्

आशयावगमनम्

आस्वादनटीकालेखनम्।

**छात्राः संघे स्थित्वा श्लोकान् पठित्वा सतालमालपन्तु।**

**श्रद्धेयाः अंशाः -**

भागभागित्वम्

आशग्रहणम्

आलपनसौन्दर्यम्।

**आमुखं , पाठभागं, व्याख्यानं च पठित्वा भूतकालार्थपदानां धातु-पद-लकार-पुरुष वचनानि अधिकृत्य निर्दिष्टाभ्यासं लिखतु।**

**श्रद्धेयाः अंशाः -**

पदानां सञ्चयः

अर्थधात्वादीनां ग्रहणम्

निर्दिष्टाभ्यासलेखनम्।

### तमर्थमिव भारत्या

वाक् अर्थः च सर्वदा सम्पृक्तौ भवतः इति लोकविदितम्। तमाशयं प्रकाशयन्त्यः बह्व्यः उक्तयः संस्कृतवाङ्मये द्रष्टुं शक्यन्ते । नन्दिकेश्वरकाशिकायाः व्याख्यायाम् एवं दृश्यते यथा-

शब्दजालमशेषं तु धत्ते मुग्धेन्दुशेखरः
अर्थजालमशेषञ्च धत्ते शर्वस्य वल्लभा ।। इति ।

कालिदासस्य रघुवंशमहाकाव्ये शिवपार्वत्योः संपृक्तता एवं वर्णिता दृश्यते -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।। इति।

तमेवाशयं कविः अस्मिन् सन्दर्भे पुनराविष्करोति तमर्थविव भारत्या इत्यनेन श्लोकेन ।

## व्याकरणकार्यम्

### पञ्चमीविभक्तिः

അതിൽനിന്ന് പോകെക്കാൾ ഹേതുവായിട്ട് പഞ്ചമി

### पदानि

| | | |
|---|---|---|
| पुत्रः | - | पुत्रात् |
| लता | - | लतायाः |
| पुत्री | - | पुत्र्याः |

### वाक्यानि

अध्यापकः ***विद्यालयात्*** गृहं गच्छति ।

जलं ***नालिकायाः*** स्रवति ।

लेखनी ***उत्पीठिकायाः*** पतति ।

सः ***अनन्तपुर्याः*** आगच्छति ।

लोकयानं ***नगरात्*** आगच्छति ।

**श्लोक:**

विद्या ददाति विनयं
***विनयाद्याति*** पात्रताम्। (विनयात्)
***पात्रत्वाद्ध***नमाप्नोति। (पात्रत्वात्)
***धनाद्ध***र्मं ततः सुखम्॥ (धनात्)

## अभ्यासप्रश्नाः

1. प्रदत्तां पट्टिकां पठित्वा उचितम् उत्तरम् अधः प्रदत्तेभ्यः चित्वा लिखतु।

| | |
|---|---|
| क) कुमारसम्भवम् | (i) पुराणम् । |
| ख) अभिज्ञानशाकुन्तलम् | (ii) महाकाव्यम्। |
| ग) भगवदज्जुकम् | (iii) नाटकम्। |
| | (iv ) प्रहसनम्। |

1) क (i), ख (ii) , ग (iii)
2) क (ii ), ख (iii), ग (iv)
3) क (iii), ख (i), ग (ii)

2. प्रदत्तां प्रस्तावनां कारणं च पठित्वा उचितमुत्तरं चित्वा लिखत।

प्रस्तावना – रघुवंशं महाकाव्यं भवति।
कारणम् - तस्मिन् महाकाव्यलक्षणानि सन्ति।

क) प्रस्तावना साधु कारणम् असाधु।
ख) प्रस्तावना साधु कारणं साधु।
ग) प्रस्तावना असाधु कारणम् असाधु।
घ) प्रस्तावना असाधु कारणं साधु।

4. अधःप्रदत्तेषु विभिन्नगणः कः इति चित्वा लिखत।

| | |
|---|---|
| (क) रामः पठति | (ख) मनुः गच्छसि |
| (ग) रघुः गच्छति | (घ) कविः लिखति। |

1) क-साधु, ख-असाधु / ग-साधु, घ - साधु
2) क-असाधु,ख-साधु / ग-असाधु, घ-असाधु
3) क-साधु, ख-असाधु / ग-साधु, घ-असाधु
4) क-असाधु, ख-असाधु / ग-साधु, घ-साधु

5. सूचनां पठित्वा संस्कृतमहाकाव्यानि अधिकृत्य उपन्यासं लिखतु।

सूचनाः - कालिदासस्य रघुवशं कुमारसंभवं च - भारवेः किरातार्जुनीयम् - श्रीहर्षस्य नैषधीयचरितम् - माघस्य शिशुपालवधम्।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| मौलिः | शिरः | ശിരസ് | head |
| इन्दुः | चन्द्रः | ചന്ദ്രൻ | moon |
| अंशुः | रश्मिः | കിരണം | ray |
| सत् | सज्जनः | സജ്ജനം | virtous people |
| परमं | श्रेष्ठम् | ശ്രേഷ്ഠം | greatest |
| आस्पदम् | स्थानम् | സ്ഥാനം | abode |
| उत्पत्य | उद्गम्य | ഉയർന്നിട്ട് | having gone up |
| आसेदुः | प्रापुः | എത്തി | reached |
| अर्घ्याः | पूज्याः | ആദരണീയർ | persons to be worshipped |
| आदाय | स्वीकृत्य | സ്വീകരിച്ചിട്ട് | having received |
| गिरिः | पर्वतः | പർവ്വതം | mountain |
| वसुन्धरा | भूमिः | ഭൂമി | The earth |
| श्रेयः | ऐश्वर्यम् | ഐശ്വര്യം | prospirity |
| भारती | वाणी | വാക്ക് | word |
| अशोच्या | शोचितुमनर्हा | ദുഃഖിക്കാൻ ഇടവരുത്താത്തവൾ | not to be repented |
| वधूः | नवोढा | വധു | bride |
| शंभुः | शिवः | ശിവൻ | God Siva |
| पार्श्वे | समीपम् | സമീപത്ത് | near by |
| वादिनि | उक्तवति | പറഞ്ഞപ്പോൾ | whenever said |
| कमलपत्राणि | पद्मदलानि | താമരയിതളുകൾ | Petals of lotus |

समर्पितमनस्कानां
जन्मान्तरेऽपि सद्यशः।

## 3 एककम्

# सेवनम्

साहित्यं मनोरञ्जकं विज्ञानप्रदायकं च भवति। साहित्यसृष्टयः समाजस्य प्रगतेः निदानं भवति । सेवनमनोभावं पोषयितुं समर्थाः बह्व्यः साहित्यकृतयः संस्कृतसाहित्ये दृश्यन्ते । तदनुस्मारयितुं बहवः प्रवक्तारः तेषां सन्देशाः च केरलेषु सन्ति। 'सेवनम्' इति नामकेऽस्मिन् एकके पाठद्वयमस्ति । 'संस्कृताय समर्पणम्' इति पाठः केरलीयसंस्कृतपण्डितान्, साहित्यकुतुकिनः तथा संस्कृतसेवकान् च प्रतिपादयति। 'किमदेयं महात्मनाम्' इति पाठे तु भूतदयालुता इत्याशयं प्रतिपादयति।



# 6 संस्कृताय समर्पणम्



**पाठप्रवेशः**

चित्रे के के सन्ति ? एतेषां योगदानानि जानन्ति वा ?

## आमुखम्

संस्कृतपण्डितानां जन्मभिरनुगृहीतः देशोऽयं केरलम् इति प्रसिद्धम् । आदिशङ्कराचार्यः, कुलशेखरः, शक्तिभद्रः, सुकुमारकविः, मेल्पुत्तुर् नारायणभट्टपादः इत्यादयः अनेके प्रतिभाशालिनः संस्कृतसाहित्याय विज्ञानाय च सविशेषं योगदानम् अयच्छन् । तेषां कृतयः काव्यसौन्दर्येण समन्वितानि अमूल्यरत्नानि भवन्ति । अत्र केषाञ्चन प्रमुखाणां संस्कृतसाहित्याचार्याणां योगदानानि संक्षेपेण निरूप्यन्ते।



## श्रीशङ्कराचार्यः

श्रीशङ्कराचार्यः भारतीयदर्शनमण्डले प्रमुखं स्थानम् अलङ्करोति। महान् तत्त्वचिन्तकः सः अष्टमशतके केरलदेशे कालटिग्रामे जातः। तस्य पिता शिवगुरुः माता आर्याम्बा च। बाल्यादेव शङ्करःअसाधारण-बुद्धिकुशलतया आध्यात्मिकतया च व्यतिरिक्तः आसीत्। सः गोविन्दभगवत्पादस्य शिष्यः आसीत्। तस्य अद्वैतदर्शनं प्रसिद्धमेव यत् "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति। प्रस्थानत्रयभाष्यकारः इति शङ्कराचार्यः प्रसिद्धः भवति। तेन सौन्दर्यलहरी, भजगोविन्दम्, विवेकचूडामणिः, आत्मबोधः इत्यादयः ग्रन्थाः रचिताः। एतेषु ग्रन्थेषु भक्तिभावं दार्शनिकगरिमां च मिलित्वा द्रष्टुं शक्नुमः। सः भारतस्य चतसृषु दिक्षु श्रृङ्गेरी-द्वारका- पुरी-बदरीकाश्रमा:"इति मठचतुष्टयं स्थापितवान्। समभावनात्मिकाम् अद्वैतचिन्तां प्रसारयितुम् अयतत इति तस्य महत्त्वम्। भारतीयदार्शनिकचिन्तायाः परिवर्तनप्रतीकः सः द्वात्रिंशे वयसि कालगतिं प्राप।

## पुन्नश्शेरि नम्पि नीलकण्ठशर्मा



श्री पुन्नश्शेरि नम्पि नीलकण्ठशर्मा केरलीयः सुप्रसिद्धः संस्कृतपण्डितः शिक्षकः च आसीत्। 1858 जूण् 17 तमे दिनाङ्के पालक्काट् जिल्लायां पट्टाम्पिदेशस्य समीपे पेरुमुटियूर् ग्रामे सः भूजातः। तस्य पिता नारायणन् नम्पि, माता अच्युतत् नङ्ङय्यान्तर्जनम् च।

सः साम्प्रदायिकरीत्या संस्कृताध्ययनं कृत्वा संस्कृत-व्याकरणालङ्कार-वैद्य- ज्योतिश्शास्त्रादिषु विषयेषु पण्डितः अभवत्। तस्य प्रमुखाः ग्रन्थाः श्रीकृष्णविलासव्याख्यानं, चमत्कारचिन्तामणिव्याख्यानं, ज्योतिश्शास्त्रसुबोधिनी, पञ्चभूतव्याख्यानं, प्रश्नमार्गस्य उपरत्नशिखाव्याख्यानं च भवन्ति। नम्पिनीलकण्ठशर्मणा सारस्वतोद्योतिनी नाम एकं शिक्षाकेन्द्रं स्थापितम्। अधुना सः संस्कृतमहाविद्यालयः, पट्टाम्पि

(SNGS COLLEGE, PATTAMBI) इति नाम्ना प्रसिद्धः। एषुत्तच्छन् पुरस्कारजेता श्री के पि नारायणपिषारटिः तस्य शिष्याणां मध्ये प्रमुखो भवति । तिरुवितांकूर्-कोच्चिमहाराजौ पुन्नश्शेरि नम्पि नीलकण्ठशर्मणः पाण्डित्यं संस्कृतयोगदानानि च परिगणय्य तं समादृतवन्तौ । संस्कृतोपासकः सः 1934 सेप्टेम्बर् 14 दिनाङ्के मृत्युमपगतः ।

## प्रोफ. पि सि देवस्या



पि सि देवस्या महोदयः केरलीयसंस्कृतसाहित्यस्य प्रमुखप्रचारकः कविः च आसीत्। प्लाक्कियिल् चाक्को देवस्या इति तस्य पूर्णं नाम। सः 1906 मार्च् 24 तमे दिनाङ्के कोट्टयम् जिल्लायाम् कुटमालूर् देशे जातः। तस्य पिता प्लाक्कियिल् चाक्को, माता अन्नम्मा च। सः आधुनिकसंस्कृतसाहित्ये सविशेषस्थानम् अलङ्करोति।

तेन विरचितं " क्रिस्तुभागवतम् " इति महाकाव्यं प्रसिद्धमस्ति। तत्र 33 सर्गाः सन्ति। काव्येऽस्मिन् क्रिस्तुदेवस्य जीवनचरितं, दैवसन्देशः, तत्त्वबोधनं च मुख्यतया प्रतिपाद्यन्ते। संस्कृतभाषाक्षेत्रे तस्य योगदानं पुरस्कृत्य सः केन्द्रीयसाहित्य-अकादमीपुरस्कारेण समादृतः। सः 2006 ओक्टोबर् 10 दिनाङ्के दिवङ्गतः।



## प्रोफ. के बालरामप्पणिक्कर्

प्रोफः के बालरामप्पणिक्कर् विख्यातः संस्कृतशिक्षकः कविः लेखकः च भवति। पत्तनंतिट्टजिल्लायां मण्णटिमन्दिरस्य समीपे ऐवर्कालाग्रामे 1910 जनुवरी 21 तमे दिनाङ्के तस्य जन्म अभवत्। तस्य पिता कोच्चुकुञ्ञ् पणिक्कर् माता नारायणि अम्मा च। सः न केवलं शिक्षकः अपि च उत्तमप्रभाषकः आसीत्। सः भारतस्य उत्तमसंस्कृतपण्डितः इति पुरस्कारं राष्ट्रपतेः अवाप।

तस्य मुख्यसंस्कृतकृतयः भवन्ति श्रीनारायणविजयम् अन्नदातृचरितम्, काव्यमञ्जरी, धातुदीपिका, शब्दरूपावली, सुबन्तकौमुदी च। 1978 जूलाई 23 तमे दिनाङ्के बालरामपणिक्कर् महोदयः मृत्युमुपगतः।

## पदच्छेदः

| | |
|---|---|
| जन्मभिरनुगृहीतः | = जन्मभिः+अनुगृहीतः |
| देशोऽयं | = देशः+अयम् |
| बाल्यादेव | = बाल्यात् + एव । |

## विग्रहः

सुदृढम् - सुष्ठु दृढम् ।

सविशेषम् - विशेषेण सह वर्तते इति ।

समादृतः - सम्यक् आदृतः ।

महाराजौ - महान् च असौ राजा च महाराजः, तौ ।

## पठनप्रवर्तनानि

### नूतनपदानि सञ्चित्य कोशनिर्माणं करोतु ।

**श्रद्धेयाः अंशाः -**

पदानां चयनम्

अर्थचयनम्

स्वकीयकोशे निवेशनम् ।

### संश्लिष्टपदानि सञ्चिनोतु । सन्धिविश्लेषणं करोतु ।

**श्रद्धेयाः अंशाः -**

संश्लिष्टपदानां चयनम्

सन्धियुक्तपदानां लेखनम्

सन्धिविश्लेषणम् ।

### केरलीयसंस्कृतपण्डितान् अधिकृत्य लघुटिप्पणीं लिखतु ।

**श्रद्धेयाः अंशाः -**

पाठ्यांशानां वाचनम्

चर्चाद्वारा आशयप्रकाशनम्

लघुटिप्पणीलेखनम् ।

**यथोचितं योजयतु ।**

| | |
|---|---|
| श्रीशङ्कराचार्य : | - पञ्चभूतव्याख्यानम् |
| बालरामपणिक्कर् | - क्रिस्तुभागवतम् |
| पुन्नश्शेरि नम्पि नीलकण्ठशर्मा | - सौन्दर्यलहरी |
| प्रोफः पि सि देवस्या | - श्रीनारायणविजयम् |

**श्रद्धेयाः अंशाः -**

पाठ्यांशानां वाचनम्
कर्तृ-ग्रन्थबन्धग्रहणम्
चर्चाद्वारा क्रोडीकरणम् ।

**अधो रेखाङ्कितं पदम् उत्तरत्वेन लब्धुं योग्यान् प्रश्नान् निर्मातु।**

(कुत्र, के, कौ, केन)

क) प्रोफः के बालरामपणिक्कर् पत्तनंतिट्टजिल्लायाम् ऐवर्काला ग्रामे जनिमलभत ।

ख) श्री पुन्नश्शेरि नम्पि नीलकण्ठशर्मणः पितरौ नारायणन् नम्पिः अच्युतत्त् नङ्गय्यान्तर्जनं च भवतः।

ग) पि सि देवस्या महोदयेन विरचितं भवति क्रिस्तुभागवतम् ।

घ) शङ्कराचार्येण सौन्दर्यलहरी, भज गोविन्दम्, विवेकचूडामणिः, आत्मबोधः इत्याद्याः ग्रन्थाः रचिताः।

**श्रद्धेयाः अंशाः -**

निर्दिष्टांशानां वाचनम् अर्थज्ञानम्
चर्चाद्वारा प्रश्नवाचकशब्दानां चयनम्
प्रश्नवाचकलेखनम् ।

**पाठभागस्थं क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखतु।**

**श्रद्धेयाः अंशाः -**

पाठ्यांशस्य वाचनम्
अव्ययानां चयनम्
उचितं पट्टिकाकरणम् ।

**पुन्नश्शेरि नीलकण्ठशर्मणः जीवनचरितं पठित्वा जीवनचरितरूपरेखां निर्मातु ।**

नाम - ................................
जन्म - ................................
पितरौ - ................................

कर्ममण्डलम् - ..............................

कृतयः - ..............................

पुरस्काराः - ..............................

देहवियोगः - ..............................

**श्रद्धेयाः अंशाः -**

पाठभागवाचनम्

चर्चा

जीवनचरितरूपरेखानिर्माणम् ।

## अधो दत्तां जीवनचरितरूपरेखां पठित्वा जीवनचरितं लिखतु ।

नाम : डा. के . एन् एष़ुत्तच्छन्

जन्मतिथिः : 1911 मेई 21

जन्मदेशः : पट्टाम्पिदेशः

पितरौ : कुटियिरिक्कल् कृष्णनेषुत्तच्छन् , कुरुवान्तोटि लक्ष्मियम्मा

कर्मरङ्गः : शिक्षकः, संस्कृतपण्डितः, भाषाशास्त्रज्ञः, इतिहासज्ञः, साहित्यकारः च

कृतिः : केरलोदयम्

देहवियोगः : 1981 ओक्टोबर् 28

**श्रद्धेयाः अंशाः -**

जीवनचरितरूपरेखावाचनम्

चर्चा

जीवनचरितलेखनम्

## स्वस्य सुहृदः च जीवनचरितरूपरेखां निर्मातु ।

**श्रद्धेयाः अंशाः -**

सुहृदा साकं सम्भाषणम्

वैयक्तिकवस्तुतानां सञ्चयनं क्रोडीकरणं च

जीवनचरितरूपरेखानिर्माणम् ।

## अभ्यासप्रश्नाः

**1) सूचनाः उपयुज्य टिप्पणीं लिखत।**

सूचनाः - बालरामपणिक्कर - संस्कृतशिक्षकः - लेखकः - कविः - पत्तनंतिट्टा- ऐवर्काला ग्रामः - पितरौ - जन्म 1910 जनुवरी 21 - उत्तमसंस्कृतपण्डितपुरस्कारः - प्रमुखाः ग्रन्थाः - दिवङ्गतः - 1978 जुलाई 23

**2) यथोचितं योजयत।**

| **नाम** | **जन्मस्थानम्** |
|---|---|
| पुन्नशशेरि नीलकण्ठशर्मा | एरणाकुलम् कालटि |
| श्री शङ्कराचार्यः | पालक्काट् पेरुमुटियूर् |
| पि सि देवस्या | पत्तनंतिट्ट ऐवर्काल |
| बालरामपणिक्कर् | कोट्टयम् कुटमालूर् |

**3) यथोचितं योजयत।**

| **नाम** | **पितरौ** |
|---|---|
| श्री शङ्कराचार्यः | अच्युतत् नङ्गय्या, नारायणन् नम्पि |
| पुन्नशशेरि नील कण्ठशर्मा | अन्नम्मा, प्लाक्कियिल् चाक्को |
| पि सि देवस्या | आर्याम्बा, शिवगुरुः |
| बालरामपणिक्कर् | नारायणि अम्मा कोच्चु कुञ्ञ् पणिक्कर् |

**4) अधोदत्तप्रस्तावनाद्वयं साधु असाधु वा इति निर्धारयत।**

क) श्रीशङ्कराचार्यः भारतीयदर्शनक्षेत्रे प्रमुखं स्थानम् अलङ्करोति।

ख ) महान् तत्त्वचिन्तकः सः अष्टमशतके केरलदेशे कालटिग्रामे भूजातः।

1) प्रस्तावना (क) साधु (ख) असाधु

2) प्रस्तावना (क) असाधु (ख) साधु

3) प्रस्तावना (क) साधु (ख) साधु

4) प्रस्तावना (क) असाधु (ख) असाधु

**5) अधोदत्तप्रस्तावनाद्वयं साधु असाधु वा इति निर्धारयत।**

क) नम्पि नीलकण्ठशर्मणा सारस्वतोद्योतिनी नाम एकं शिक्षाकेन्द्रं स्थापितम्।

ख) अधुना तत् संस्कृतमहाविद्यालयः अनन्तपुरी इति नाम्ना प्रसिद्धम्।

1) प्रस्तावना (क) साधु (ख) असाधु

2) प्रस्तावना (क) असाधु (ख) साधु

3) प्रस्तावना (क) साधु (ख) साधु

4) प्रस्तावना (क) असाधु (ख) असाधु

## व्याकरणकार्यम्

### धातुपरिचयः

भू धातुः परस्मैपदी लङ् ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | अभवत् | अभवताम् | अभवन् |
| म.पु. | अभवः | अभवतम् | अभवत |
| उ.पु. | अभवम् | अभवाव | अभवाम । |

### विभक्तिपरिचयः - षष्ठीविभक्तिः

ഇക്കും ഇന്നും ഉടെ ഷഷ്ഠിക്ക് അതിന്റെ വെച്ചും എന്നപി

### पदानि

| प्रथमाविभक्तिः | षष्ठी विभक्तिः |
|---|---|
| एकवचनम् | एकवचनम् । |
| बालः | बालस्य |
| लता | लतायाः |
| पुत्री | पुत्र्याः |
| वाहनम् | वाहनस्य |

### वाक्यानि

मम राष्ट्रस्य नाम भारतम् ।

बालिकायाः नाम काव्या ।

विवेकानन्दस्य गुरुः रामकृष्णपरमहंसः।

### श्लोकः

***हस्तस्य*** भूषणं दानम्  
सत्यं ***कण्ठस्य*** भूषणम्।  
***श्रोत्रस्य*** भूषणं शास्त्रम्  
भूषणैः किं प्रयोजनम् ॥

### व्याकरणविशेषः

महाराजः - नान्तस्य राजन् शब्दस्य समासे अकारान्तत्वं स्यात्।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| व्यतिरिक्तः | भिन्नः | വേറിട്ട് നിൽക്കുന്നയാൾ | different person |
| दिवङ्गतः | स्वर्गं प्राप्तः | മരണപ്പെട്ടവൻ | dead |
| समाकलितम् | संकलितम् | കൂട്ടിച്ചേർത്തത് | integrated |
| निष्फलम् | व्यर्थम् | നിഷ്പ്രയോജനം | futile |
| मिलित्वा | सम्मिश्र्य | ഒരുമിച്ച് | together |
| शिक्षकः | अध्यापकः | അധ്യാപകൻ | preceptor |
| साम्प्रदायिकरीत्या | परम्परागतरीत्या | പരമ്പരാഗതരീതിയിൽ | as per traditional method |
| योगदानम् | अंशदानम् | സംഭാവന | contribution |
| गरिमा | गौरवम् | മഹത്വം | grandeur |
| अवाप | अलभत | നേടി | won |

कृतिनां जीवितं धन्यं
प्राणत्यागेन वा क्वचित्॥

# 7 किमदेयं महात्मनाम् !

**पाठप्रवेशः**

कर्णस्त्वचं शिबिर्मांसं
जीवं जीमूतवाहनः।
ददौ दधीचिरस्थीनि
किमदेयं महात्मनाम्॥ (भर्तृहरिः)

कर्णः त्वचं (ददौ) शिबिः मांसं (ददौ) जीमूतवाहनः जीवं (ददौ) दधीचिः अस्थीनि ददौ। महात्मनाम् अदेयं किमपि नास्ति।

## आमुखम्

हर्षवर्धनः षष्ठे शतके उत्तरभारतस्य प्रसिद्धः नृपतिः बौद्धमतानुयायी च आसीत्। तेन रत्नावली, प्रियदर्शिका, नागानन्दम् इति रूपकत्रयं रचितम्। त्रिषु नागानन्दम् एव लक्षणयुक्तं नाटकं भवति। पञ्चाङ्कयुक्ते नाटके जीमूतवाहनकथा एव उपनिबद्धा।

महिते भारतीयपैतृके परहिताय आत्मत्यागोऽपि प्रशंस्यते। आत्मत्यागप्रशंसकानि अनेकानि आख्यानोपाख्यानानि संस्कृतसाहित्ये दृश्यन्ते। तादृशमेकम् उपाख्यानं भवति जीमूतवाहनकथा।

विद्याधराणां राजा जीमूतकेतुः सपत्नीकः वानप्रस्थाय आश्रममगच्छत्। तस्य पुत्रो जीमूतवाहनः पितृदत्तं राज्यं विहाय कानने मातृपित्रोः सेवायै प्रस्थितश्च। सः तत्र गौरीमन्दिरे वीणावादनपरायां मलयवत्यां अनुरक्तो भूत्वा तामेव परिणीतवान् च। अन्ते गरुडात् नागानां रक्षणार्थं स्वप्राणान् अत्यजत् इति कथा।

उदारचरिताः जनाः परोपकारार्थम् आत्मत्यागमपि कर्तुं सन्नद्धाः एव। कर्णः स्वदेहरक्षके कवचकुण्डलानि इन्द्राय ददौ। शिबिः कपोतभारतुल्यं मांसं छित्वा ददौ। दधीचिः नाम महर्षिः देवरक्षार्थं स्वस्य दृढानि अस्थीनि ददौ। जीमूतवाहनः स्वप्राणान् पररक्षार्थं ददौ। महात्मनाम् अदेयं किमपि नास्ति। पाठं पठामः।

जीमूतवाहनः कश्चित् विद्याधरकुमारः आसीत्। सः स्वमित्रेण आत्रेयेण सह मलयपर्वते निवासाय युक्तं स्थानम् अन्विष्टवान्। यस्मात् तस्य पितरौ तयोः वार्धक्यकालं मलयपर्वते एव वस्तुम् इच्छन्तौ आस्ताम्। तयोः सेवनमेव जीमूतवाहनस्य जीवितलक्ष्यम्। तदेव राज्यसुखादपि श्रेष्ठमिति सः अचिन्तयत्। राज्यसुरक्षां दृढीकृत्य राज्यधुरं सचिवेषु निक्षिप्य सः मातृपितृसेवनार्थं निश्चितवान्।

एकदा पर्वतशिखरे सवयसा सह भ्रमणसमये मधुरं संगीतध्वनिमशृणोत्। तस्य प्रभवस्थानम् अन्विष्य तौ गौरीमन्दिरं प्राप्य तत्र सिद्धकन्यां मलयवतीम् अपश्यताम्। कञ्चित्कालानन्तरं जीमूतवाहनमलयवत्योः प्रणयः विवाहश्चाभवत्। तदन्तरा स्वराज्यं शत्रुणा मतंगेन स्वायत्तीकृतमिति वार्ता आगता। तथापि युद्धाय जीमूतवाहनः सन्नद्धः न अभवत्।



अन्येषां साहाय्यार्थं नितरां सन्नद्धः अयम् एकदा नागमातुः दुरवस्थां यदृच्छया शृणोति। नागानां शत्रुः भवति गरुडः। सः प्रतिदिनम् एकैकं नागं हत्वा खादति स्म। तदर्थं एकैकेन सर्पेण प्रतिदिनं गरुडस्य समीपम् आगन्तव्यम् इति व्यवस्था आसीत्। नो चेत् गरुडः नागकुलमेव नाशयेत् इति भीत्या एव ते नागाः प्रतिज्ञाम् अपालयन्।

एकदा वृद्धनागदम्पत्योः एकमेव पुत्रं शङ्खचूडम् एव गरुडस्य भक्षणरूपेण निश्चितवन्तः। नागदम्पत्योः दुःखम् असहमानः जीमूतवाहनः स्वयमेव गरुडस्य भक्षणरूपेण गन्तुं निश्चिकाय। दुकूलेन आच्छादितं जीमूतवाहनं नागकुमारं शङ्खचूडं मत्वा गरुडः खादितुमारब्धवाञ्च। भोजनमध्ये गरुडः ज्ञातवान् एषः नागकुमारः नास्ति, अन्यः कोऽपि इति। तदन्तरे जीमूतवाहनः मृत्युमुपगतः। पश्चात्तापविवशस्य गरुडस्य तथा लोकमातुः देव्याः च अनुग्रहेण तस्य पुनर्जन्म अभवत्। महात्मनां जीवितं परोपकाराय एव।

परोपकाराय फलन्ति वृक्षाः
परोपकाराय दुहन्ति गावः।
परोपकाराय वहन्ति नद्यः
परोपकारार्थमिदं शरीरम्॥

वृक्षाः परोपकाराय फलन्ति। गावः परोपकाराय दुहन्ति। नद्यः परोपकाराय वहन्ति। इदं शरीरं परोपकारार्थम्।

## पदच्छेदः

| | |
|---|---|
| कर्णस्त्वचम् | = कर्णः + त्वचम् |
| शिबिर्मांसम् | = शिबिः + मांसम् |
| दधीचिरस्थीनि | = दधीचिः + अस्थीनि |
| राज्यसुखादपि | = राज्यसुखात् + अपि |
| विवाहश्चाभवत् | = विवाहः + च + अभवत् |
| नो चेत् | = न + चेत् |
| नास्ति | = न + अस्ति |
| कोऽपि | = कः + अपि |

## विग्रहः

| | |
|---|---|
| महात्मनाम् | - महान् आत्मा यस्य, तेषाम् |
| उदारचरिताः | - उदारं चरितं येषां ते |
| सवयसा | - समानं वयः यस्य सः सवयाः, तेन |

| | |
|---|---|
| परोपकारार्थम् | - परेभ्यः उपकारः परोपकारः, तदर्थम् |
| देवरक्षार्थम् | - देवानां रक्षा देवरक्षा तदर्थम् |
| पररक्षार्थम् | - परेषां रक्षा पररक्षा तदर्थम् |
| अदेयम् | - दातुं योग्यं देयम्, न देयम् |
| स्वमित्रेण | - स्वस्य मित्रं स्वमित्रम्, तेन |
| राज्यसुरक्षां | - राज्यस्य सुरक्षा ताम् |
| मातृपितृसेवनार्थम् | - माता च पिता च मातापितरौ, तयोः सेवनार्थम् |
| पर्वतशिखरे | - पर्वतस्य शिखरे |
| नागकुलम् | - नागानां कुलम् |
| लोकमातुः | - लोकानां माता, तस्याः |
| पितरौ | - माता च पिता च |
| प्रतिदिनम् | - दिने दिने। |

## पठनप्रवर्तनानि



**पाठभागं पठित्वा प्रदत्तश्लोकेषु विद्यमानानां समस्तपदानां चयनं कुरुत। विग्रहवाक्यं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
विग्रहचयनम्
विग्रहलेखनम्।



**पाठभागं पठित्वा प्रदत्तश्लोकेषु विद्यमानानां संयुक्तपदानां सन्धिच्छेदं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
सन्धियुक्तपदचयनम्
सन्धियुक्तपदलेखनम्।

**पाठभागस्य  आमुखं पठित्वा हर्षवर्धनं तस्य नाटकानि च अधिकृत्य टीकां लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

आशयसंग्रहः

टीकालेखनम्।

**पाठभागं पठित्वा कथास्तम्भनिर्माणं करोतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

कथास्तम्भक्रमीकरणम्

कथास्तम्भलेखनम्

**पाठभागं पठित्वा कथाभागं सम्भाषणरूपेण परिवर्तयतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

सम्भाषणक्रमीकरणम्

सम्भाषणलेखनम्।

**कथाम् उच्चैः वाचयतु।**

**श्रद्धेयाः अंशाः -**

संघे वाचनम्

परिशीलनम्

कथायाः वाचनम्।

**पाठभागं पठित्वा 'भूतदयालुता ' इति आशयप्रतिप्रतिपादकाः सदृशाः कथाः चित्वा लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

कथाचयनम्

कथालेखनम्।

## व्याकरणविशेषः

आत्रेयेण सह - सहयुक्ते अप्रधाने तृतीया स्यात्।
सवयसा सह - सहयुक्ते अप्रधाने तृतीया स्यात्।
खादति स्म - स्म शब्दयोगे भूतकालार्थः।
इन्द्राय ददौ - दानार्थकक्रियायां चतुर्थी।
पितरौ - माता च पिता च। मात्रा सह समासे पितृशब्द एव शिष्यते।

## अभ्यासप्रश्नाः

1) उदाहरणानुसारं पदच्छेदं कुरुत।

उदा - तत् + अन्विष्य - तदन्विष्य

क ) राजसुखात् + अपि - - - - - - - -

उदा - तव + एतत् - तवैतत्

ख) मम + एवम् - - - - - - - -

2 ) एकपदं लिखत।

क) पर्वतस्य शिखरे - - - - - - - - -

ख) उदारं चरितं येषां ते - - - - - - - - -

3) कथास्तम्भं क्रमीकुरुत।

* राज्यधुरम् अमात्येषु निधाय मलयपर्वतं गतवान्।
* जीमूतवाहनः कश्चित् विद्याधरकुमारः आसीत्।
* गरुडः प्रतिदिनम् एकैकं नागं हत्वा खादति स्म।
* जीमूतवाहनं शङ्खचूडं मत्वा खादितुमारब्धवान्।
* गरुडस्य अनुग्रहेण जीमूतवाहनस्य पुनर्जन्म अभवत्।
* जीमूतवाहनः नागमातुः दुरवस्थां शृणोति।

4) नागानन्दकथां तत्कर्तारं च अधिकृत्य सूचनानुसारम् उपन्यस्यत।

हर्षवर्धनः - जीमूतवाहनः कश्चित् विद्याधरकुमारः - राज्यधुरम् अमात्येषु निधाय मलयपर्वत गमनम् - जीमूतवाहनः नागमातुः दुरवस्थां शृणोति - गरुडस्य नागभोजनम् - जीमूतवाहनं शङ्खचूडं मत्वा खादनम् - गरुडस्य अनुग्रहेण जीमूतवाहनस्य पुनर्जन्म।

5) कथाभागं पठित्वा कथां सम्भाषणरूपेण परिवर्त्तयत।

6 ) भूतदयालुता इति विषयमधिकृत्य श्लोकोक्तदिशा उपन्यस्यत।

कर्णस्त्वचं शिबिर्मांसं
जीवं जीमूतवाहनः।
ददौ दधीचिरस्थीनि
किमदेयं महात्मनाम्॥

## व्याकरणकार्यम्

### क) विभक्तिपठनम् - सप्तमी विभक्तिः।

അതിങ്കൽ അതിൽ വെച്ചെന്നും വിഷയം സപ്തമി മതാ

**पदानि**

| प्रथमा | | सप्तमी |
|---|---|---|
| चषकः | - | चषके |
| ग्रामः | - | ग्रामे |
| स्थालिका | - | स्थालिकायाम् |
| नदी | - | नद्याम् |
| भवनम् | - | भवने |

**वाक्यानि**

सः ***विद्यालये*** पठति।
काकः ***वृक्षे*** उपविशति।
वस्त्रं ***पेटिकायाम्*** अस्ति।
तैलं ***कूप्यां*** नास्ति।
भोजनं ***कदलीपत्रे*** अर्पयतु।

## श्लोकः

***शैले शैले*** न माणिक्यं
मौक्तिकं न ***गजे गजे*** ।
साधवो न हि सर्वत्र
चन्दनं न ***वने वने*** ॥

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| वस्तुम् | वासाय | വസിക്കുവാൻ | to stay |
| अमात्यः | सचिवः | മന്ത്രി | minister |
| निक्षिप्य | निधाय | വച്ചിട്ട് | having placed |
| वयस्यः | सुहृत् | സുഹൃത്ത് | friend |
| नागः | सर्पः | സർപ്പം | snake |
| हत्वा | हननं कृत्वा | കൊന്നിട്ട് | having killed |
| दुकूलम् | क्षौमम् | പട്ടുവസ്ത്രം | silk |
| मत्वा | विचिन्त्य | ചിന്തിച്ചിട്ട് | having thought |
| अन्तरा | तदैव | അതേസമയം | at the same time |

जीवनं सरसं कर्तुं
शब्दार्थावपि सक्षमम् ॥

4 एककम्

# आस्वादनम्



## आमुखम्

संस्कृतसाहित्ये काव्यं दृश्य-श्रव्यरूपेण द्विविधा विभक्तम् । शैलीभेदेन इदं तु गद्यं पद्यं चम्पूः इति त्रिधा च भवति । पद्यं चतुष्पदी । अपादः पदसंघातः गद्यम् । गद्यपद्यमयं चम्पूः। काव्यनिष्ठो धर्म एव चमत्कारः अथवा चमत्कृतिः । सहृदयहृदयाह्लादार्थं कविः काव्येषु चमत्कृतिजनकान् अलङ्कारान् योजयति । आस्वादनम् नामके एककेऽस्मिन् त्रयः पाठाः सन्ति । अत्र प्रथमपाठः भवति 'काव्यशास्त्रविनोदेन' इति । पाठेऽस्मिन् सरसश्लोकान् विवृणोति। संस्कृतभाषायां सरसाः सरलाः च चाटुश्लोकाः बहवः भवन्ति । द्वितीये 'वाणी लावण्यवती' इत्यस्मिन् पाठे अलङ्कारान् प्रतिपादयति । तृतीयः पाठः तु 'वाणी रूपवती' इति । छन्दश्शास्त्रानुसारमेव काव्येषु वृत्तानां प्रवृत्तिः इति ज्ञातुं पाठोऽयं बहूपकारको भवति ।

# 8 काव्यशास्त्रविनोदेन




## पाठप्रवेशः

काव्यशास्त्रविनोदेन
कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां
निद्रया कलहेन च ॥

धीमतां कालः काव्यशास्त्रविनोदेन गच्छति । मूर्खाणां कालः व्यसनेन निद्रया कलहेन च गच्छति।

## आमुखम्

संस्कृतकवनशाखायां कौतुकावहाः हास्योद्दीपकाः च सरसश्लोकाः दृश्यन्ते । वर्णपद-वाक्यविन्यासवैचित्र्येण एकैकस्यापि भिन्नं भिन्नं हास्यास्पदं पद्यम् आविष्कुर्वन्ति प्रतिभाशालिनः कवयः । पाठेऽस्मिन् कांश्चन सरसश्लोकान् पठामः ।

1. **वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः ।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च धत्ते न घटो न मेघः ॥**

**पदच्छेदः**

घटो न = घटः + न
शिरो नास्ति = शिरः + न + अस्ति

**विग्रहः**

वृक्षाग्रवासी - वृक्षस्य अग्रे वस्तुं शीलम् अस्य ।
पक्षिराजः - पक्षिणां राजा पक्षिराजः ।
त्वग्वस्त्रधारी - त्वग्वस्त्रं धर्तुं शीलम् अस्य ।
शूलपाणिः - शूलं पाणौ यस्य सः ।
सिद्धयोगी - सिद्धश्च असौ योगी च ।

**अन्वयः**

वृक्षाग्रवासी च पक्षिराजः न, त्रिनेत्रधारी च शूलपाणिः न, त्वग्वस्त्रधारी च न सिद्धयोगी, जलं धत्ते (किन्तु) न घटः न मेघः ।

**आशयः**

वृक्षस्य अग्रे वसति किन्तु पक्षिराजः न भवति । नेत्रत्रयम् अस्ति किन्तु शूलपाणिः शिवः न भवति। त्वग्वस्त्रम् एव धरति किन्तु सिद्धयोगी न भवति । जलं धरति किन्तु घटः न भवति मेघःच न भवति ।

<u>उत्तरम्</u> - <u>नारिकेलः</u>

2. **अस्ति कुक्षिः शिरो नास्ति**
**बाहुरस्ति निरङ्गुलिः ।**
**अपादो नरभक्षी च**
**यो जानाति स पण्डितः ॥**

**पदच्छेदः**

बाहुरस्ति = बाहुः + अस्ति
यो जानाति - यः + जानाति

**विग्रहः**

निरङ्गुलिः - निर्गताः अङ्गुलयः यस्मात् सः ।
अपादः - न पादौ यस्य सः ।
नरभक्षी - नरं भोक्तुं शीलम् अस्य ।
पण्डितः - पण्डा अस्य सञ्जाता इति पण्डितः। (पण्डा- आत्मविषयिका बुद्धिः)

**अन्वयः**

कुक्षिः अस्ति, शिरः नास्ति, बाहुः अस्ति, निरङ्गुलिः (भवति), अपादः (अस्ति), नरभक्षी च (अस्ति) । यः जानाति सः पण्डितः भवति।

**आशयः**

उदरः अस्ति, शिरः नास्ति, हस्तौ स्तः, अङ्गुल्यः न सन्ति, पादौ न स्तः, नरभक्षी च भवति । यः उत्तरं जानाति सः पण्डितः भवति ।

**उत्तरम्** - युतकम्

3. कस्तूरी जायते कस्मात्
को हन्ति करिणां कुलम् ।
किं कुर्यात् कातरो युद्धे
मृगात् सिंहः पलायते ॥

**पदच्छेदः**

को हन्ति = कः + हन्ति
कातरो युद्धे = कातरः + युद्धे

**अन्वयः**

कस्तूरी कस्मात् जायते? करिणां कुलं कः हन्ति? कातरः युद्धे किं कुर्यात्? मृगात् सिंहः पलायते।

**आशयः**

कस्तूरी कस्मात् जायते? - मृगात् ।
करिणां कुलं कः हन्ति? - सिंहः ।
कातरः युद्धे किं कुर्यात्? - पलायते ।

4. काव्यं करोमि न हि चारुतरं करोमि
यत्नात् करोमि यदि चारुतरं करोमि।
भूपालमौलिमणिरञ्जितपादपीठ!
हे साहसाङ्क! कवयामि वयामि यामि ॥



## विग्रहः

चारुतरं - इदमनयोः चारु ॥

भूपालमौलिमणिरञ्जितपादपीठ - भूपालानां मौलिः भूपालमौलिः, तस्मिन् यः मणिः भूपाल-मौलिमणिः, तेन रञ्जितं पादपीठं यस्य, तत्सम्बुद्धौ ।

साहसाङ्क - साहस एव अङ्कः यस्य, तत्सम्बुद्धौ ।

## अन्वयः

हे भूपालमौलिमणिरञ्जितपादपीठ! साहसाङ्क ! अहं काव्यं करोमि, चारुतरं न हि करोमि । यदि यत्नात् करोमि चारुतरं करोमि । कवयामि वयामि यामि ।

## आशयः

एकदा भोजराजस्य निर्देशानुसारं कश्चन तन्तुवायः स्वसंस्कृतपाण्डित्यं सभायां प्रकटयति । अहं काव्यकरणे समर्थः अपि सुन्दरं काव्यं झटिति एव न रचयामि । किन्तु प्रयत्नं करोमि चेत् सुन्दरं काव्यम् अहं रचयामि । सर्वेषां भूपालानां किरीटमणिभिः विभूषितपादपीठ! हे सुन्दर! इदानीं मया काव्यं करणीयम् वा तन्तुवयनं करणीयं वा गन्तव्यं वा इति ।

## पठनप्रवर्तनानि



**पाठभागं पठित्वा श्लोकान् सतालं आलपतु।**

**श्रद्धेयाः अंशाः -**

श्लोकश्रवणम्
श्लोकपठनम्
श्लोकालपनम्।



**पाठभागं पठित्वा प्रदत्तश्लोकानाम् अन्वयं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
आशयग्रहणम्
अन्वयलेखनम्।



**पाठभागं पठित्वा प्रदत्तश्लोकानाम् आशयं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
आशयग्रहणम्
आशयलेखनम्।



**पाठभागं पठित्वा प्रदत्तश्लोकेषु विद्यमानानां समस्तपदानां विग्रहं लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
विग्रहचयनम्
विग्रहलेखनम्।



**पाठभागं पठित्वा श्लोकस्थान् पदच्छेदान् लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा
समस्तपदचयनम्
सन्धिलेखनम्।



**पाठभागं पठित्वा प्रदत्तश्लोकसदृशाः प्रहेलिकाः समस्याः सरसश्लोकान् च चित्वा लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा

श्लोकचयनम्
श्लोकलेखनम्।

## व्याकरणकार्यम्

क) विभक्तिपठनम् - सम्बोधना प्रथमा

### पदानि

| | | |
|---|---|---|
| बालः | - | हे बाल |
| वृक्षः | - | हे वृक्ष |
| रमा | - | हे रमे |
| ललिता | - | हे ललिते |
| नदी | - | हे नदि |
| श्रीमन् | - | हे श्रीमन् |
| गुरुः | - | हे गुरो |
| पिता | - | हे पितः |
| माता | - | हे मातः |

### वाक्यानि

***हे मातः***! मह्यम् ओदनं देहि।
***हे बाल!*** यथानियमं मार्गेण यानं चालय।

### श्लोकः

***श्रीकृष्ण! गेविन्द! हरे! मुरारे!***
***हे नाथ! नारायण! वासुदेव!*** ।

### व्याकरणविशेषः

पक्षिराजः - नकारान्तः राजन्-शब्दः समासे अकारान्तः भवति।

## अभ्यासप्रश्नाः

**1) अन्वयं लिखत।**

काव्यं करोमि न हि चारुतरं करोमि
यत्नात् करोमि यदि चारुतरं करोमि।
भूपालमौलिमणिरञ्जितपादपीठ**!**
हे साहसाङ्क**!** कवयामि वयामि यामि ॥

**2) पदच्छेदं लिखत ।**

क ) बाहुरस्ति - ______+______

ख ) तत्रैव - ______+_______

**3) विग्रहवाक्यं लिखत ।**

क ) वृक्षाग्रवासी - ................................।

ख ) पक्षिराजः - ..................................।

ग ) चारुतरम् - ...............................।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| कुक्षिः | उदरम् | വയർ | stomach |
| शूलपाणिः | शिवः | ശിവൻ | Lord Siva |
| बाहुः | हस्तः | കൈ | hand |
| करिः | गजः | ആന | elephant |
| कातरः | सम्भीतः | പേടിച്ചവൻ | afraid |
| पलायते | पलायनं करोति | ഓടുന്നു | runs |
| चारु | मनोहरं | മനോഹരം | charming |
| यत्नः | श्रमः | പരിശ്രമം | effort |
| मणिः | रत्नम् | രത്നം | germ |

काव्यशास्त्रविनोदाच्च
वाणी लावण्यभूषिता ।



# 9 लावण्यवती वाणी

**पाठप्रवेशः**

अधीतेषु पाठेषु केषाञ्चन साहित्यकृतीनां मनोहारितां वयं पठितवन्तः। गद्यपद्ययोः को भेदः इति च वयं जानीमः? साहित्यकृतीनाम् आस्वादने मुख्यहेतुः चमत्कारः एव । काव्यशरीरभूतस्य शब्दस्य तथा प्राणभूतस्य अर्थस्य च गुणोत्कर्षाय अलङ्काराः एव मुख्यहेतवः । केषाञ्चन अलङ्काराणां विवरणम् अस्मिन् पाठभागे परिचिनुमः ।

## आमुखम्

संस्कृतसाहित्ये सौन्दर्यशास्त्रमिति प्रसिद्धं भवति अलङ्कारशास्त्रम् । भामहः, दण्डी, मम्मटः, अप्पय्यदीक्षितः इत्यादयः बहवः आचार्याः अलङ्कारस्य वैविध्यं लक्षणं च अधिकृत्य बहून् ग्रन्थान् व्यरचयन् । अप्पय्यदीक्षितस्य कुवलयानन्दः इति ग्रन्थात् उपमा, अनन्वयः, दीपकम्, व्यतिरेकः काव्यलिङ्गम् इति अर्थालङ्कारपञ्चकम् अनुप्रासं नाम शब्दालङ्कारः च अस्मिन् पाठे दीयते ।

भामहः - काव्यालङ्कारः
दण्डी - काव्यादर्शः
मम्मटः - काव्यप्रकाशः
अप्पय्यदीक्षितः - कुवलयानन्दः ।

## उपमा

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयो: ।
हंसीव कृष्ण ! ते कीर्तिस्स्वर्गङ्गामवगाहते ।।

**लक्षणम्** - यत्र द्वयो: उपमानोपमेययो: (कथापात्रयो:, वस्तुनो:, प्रतिभासयो: वा) सहृदयहृदयाह्लादकतया चारु सादृश्यम् उल्लसति तत्रोपमालङ्कार:।

**उदा** - हे कृष्ण ! ते कीर्ति: हंसी इव स्वर्गङ्गाम् अवगाहते- व्याप्नोति इत्यर्थ:।अत्र उपमानं हंसी उपमेयं कृष्णस्य कीर्ति: च । उपमानोपमेययो: हंसीकीर्त्यो:सादृश्यलक्ष्मी: ' इव ' इति पदेन स्पष्टं प्रकाशते इत्यत: उपमालङ्कार: ।

अलङ्कारशास्त्रे वर्ण्यम्, उपमेयं, प्रकृतं, विषय:, प्रस्तुतम् इत्यादय: शब्दा: समानार्थे प्रयुज्यन्ते । अवर्ण्यम्, उपमानम्, अप्रकृतं, विषयी, अप्रस्तुतम् इत्यादय: समानार्थका: । वर्णयितुं योग्यं वस्तु उपमेयम् अप्रसिद्धम् । येन उपमीयते तत् उपमानम् अप्रकृतं प्रसिद्धं वस्तु च ।

उपमा पूर्णोपमा लुप्तोपमा चेति द्विधा । उपमाया: चत्वारो अवयवा: सन्ति । उपमानम्, उपमेयं, साधारणधर्म:, उपमावाचक: चेति । उदाहरणे हंसी - उपमानम्, कीर्ति: - उपमेयं, स्वर्गङ्गावगाहनं - साधारणधर्म:, इवशब्द: - उपमावाचक: इति चतुर्णाम् उपमाघटकानाम् उपादानात् पूर्णोपमा ।

उपमेयादिषु चतुर्षु एकस्य द्वयो: त्रयाणां वा अनुपादाने लुप्तोपमा । सा च अष्टधा (1) वाचकलुप्ता (2)धर्मलुप्ताा (3) धर्मवाचकलुप्ता (4) वाचकोपमेयलुप्ता (5) उपमानलुप्ता (6) वाचकोपमानलुप्ता (7) धर्मोपमानलुप्ता (8) धर्मोपमानवाचकलुप्ता चेति ।

## अनन्वय:

उपमानोपमेयत्वं यदेकस्यैव वस्तुन: ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वय: ।।

**लक्षणम्** - एकस्य एव वस्तुन: उपमानोपमेयत्वे अनन्वय:।

**उदा-** इन्दु: इन्दु: इव श्रीमान् इत्यादौ अनन्वय: ।

एकस्यैव वस्तुन: उपमानोपमेयत्ववर्णनमनन्वय:। अर्थात् द्वितीयसदृशवस्तुनिषेध: अनन्वय:।

## दीपकम्

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।
मदेन भाति कलभः प्रतापेन महीपतिः।

**लक्षणम्** - वर्ण्यावर्ण्यानां प्रस्तुताप्रस्तुतानां धर्मैक्यं एकधर्मान्वयः दीपकम्।

**उदा** - कलभः करिकलभः मदेन महीपतिः प्रतापेन च भाति इति वर्णितम्। अत्र वर्ण्यस्य राज्ञः अवर्ण्यस्य कलभस्य च भासनरूपं धर्मैक्यं ' भाति ' इति एकक्रियया वर्णितम् इत्यतः दीपकालङ्कारः।

## व्यतिरेकः

व्यतिरेको विशेषश्चेदुपमानोपमेययोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥

**लक्षणम्** - उपमानोपमेययोः एकस्य इतरापेक्षया विशेषः यत्र वर्ण्यते तत्र व्यतिरेकः।

**उदा** - शैलाः उपमानं, सज्जनाः उपमेयम्। उभयोरपि औन्नत्यरूपम् सादृश्यम् अस्ति। तथापि उपमेयानां सज्जनानां प्रकृतिकोमलत्वरूपः विशेषः अस्तीति कल्पितत्वात् व्यतिरेकालङ्कारः।

## काव्यलिङ्गम्

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।
जितोऽसि मन्द! कन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः॥

**लक्षणम्** - यत्र समर्थनीयस्य अर्थस्य समर्थनं वर्ण्यते तत्र काव्यलिङ्गालङ्कारः।

**उदा** - जितोऽसि मन्दः! कन्दर्प!...... " इत्यत्र हे मूढ! कामदेव! त्वं मया पराजितः असि। यतः मे हृदि तव दाहकः साक्षात् शिवः सदा वर्तते। कामदेवोपरि विजयरूपः समर्थनीयः अर्थः। हृदि शिवसान्निध्यात् कामदेवोपरि विजयः आर्जितः इति समर्थितत्वात् काव्यलिङ्गालङ्कारः।

## शब्दालङ्कारः

यत्र अर्थातिरिक्ततया शब्दविन्यासेन चरुतायाः प्राधान्यं वर्तते तत्र शब्दालङ्कारः। तादृशेषु श्लोकेषु अर्थस्य प्राधान्यं न्यूनं स्यात्। सः अनुप्रासः, अन्त्यप्रासः, यमकम्, चित्रम्, बिन्दुच्युतकादिभेदात् बहुधा वर्तते। तेषु अनुप्रासयमकयोः प्राधान्यम्।

### अनुप्रासः

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।

**लक्षणम्** – यस्मिन् पद्ये वर्णस्य आवर्तनं भवति, तदनुप्रासयुक्तं पद्यं भवति।

**उदा -** अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम् ।

अत्र 'न्द' इत्यस्य असकृत् आवर्तनात् अनुप्रासः ।

## पठनप्रवर्तनानि

**अलङ्कारग्रन्थानां ग्रन्थकर्तॄणां च नामानि पट्टिकारूपेण लिखतु।**

**श्रद्धेयौ अंशौ -**

अलङ्कारग्रन्थानां नामग्रहणम्

ग्रन्थकर्तॄणां नामग्रहणम् ।

**काव्यलिङ्गालङ्कारस्य लक्षणं उदाहरणं च योजयित्वा लिखतु।**

**श्रद्धेयौ अंशौ -**

लक्षणग्रहणम्

उदाहरणग्रहणं समन्वयश्च ।

**संघशः चर्चां कृत्वा अलङ्कारमधिकृत्य प्रश्नोत्तरक्रीडाम् आयोजयतु ।**

**श्रद्धेयाः अंशाः -**

भागभागित्वम्

प्रश्नकरणसामर्थ्यम्

उचिताशयावगमनम् ।

**संघशः चर्चां कृत्वा काव्यांशानां अलङ्कारान् निर्णयतु ।**

**श्रद्धेयाः अंशाः -**

भागभागित्वम्

वाचनम् आशयग्रहणञ्च

उचितालङ्कारावगमनम् ।

**अलङ्कारान् पठित्वा समानोदाहरणानि सन्दृश्य लिखतु ।**

**श्रद्धेयाः अंशाः -**

वाचनम्

उचिताशयावगमनम्

समाहरणम् ।

**पाठभागस्थान् अलङ्कारान् उपयुज्य तैः युक्तानि कैरलीचलच्चित्रगीतानि सञ्चित्य लिखतु। ICT साह्य्येन वीडियो क्लिप्पिङ्स् अपि रचयतु।**

(उपमा, अनन्वय:, दीपकम्, व्यतिरेक:, काव्यलिङ्गम्)

**श्रद्धेया: अंशाः -**

गीतकानां श्रवणम्

अलङ्कारविवेचनम्

पट्टिकाकरणम्।

## अभ्यासप्रश्नाः

1. काव्यांशेषु प्रयुक्तान् अलङ्कारान् लिखतु।

उदा-

| काव्यांशः | अलङ्कारः |
|---|---|
| मदेन भाति कलभ: प्रतापेन महीपति:। | दीपकम् |
| हंसीव कृष्ण ! ते कीर्ति : स्वर्गङ्गामवगाहते। | ..................................... |
| जितोऽसि मन्द! कन्दर्प ! मच्चित्तोऽस्ति त्रिलोचन:। | .................................. |

2. प्रस्तावनाया: कारणस्य च साधुतां परिशोधयतु।

प्रस्तावना - शैला इवोन्नता: सन्त: किन्तु प्रकृतिकोमला: - अत्र व्यतिरेकालङ्कारः।

कारणम् - शैलेषु उन्नतत्वं कोमलत्वं च वर्तते।

i) प्रस्तावना साधु कारणम् असाधु।

ii) प्रस्तावना असाधु कारणं साधु।

iii) प्रस्तावना साधु कारणं साधु।

iv) प्रस्तावना असाधु कारणम् असाधु।

***उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।***
***नृत्यन्ती काव्यरङ्गे रञ्जयति तद्विदां चेत:॥***

## അനുബന്ധം

| | |
|---|---|
| അലങ്കാരം | ശബ്ദാർത്ഥങ്ങളിൽ വച്ചൊന്നിൽ<br>വാച്യമായിട്ടിരുന്നിടും<br>ചമത്ക്കാരംചമയ്ക്കുന്ന<br>മട്ടലങ്കാരമായത് |

### അർത്ഥാലങ്കാരം

| | |
|---|---|
| ഉപമ | ഒന്നിനോടൊന്നു സാദൃശ്യം<br>ചൊന്നാലുപമയാമത്<br>മന്നവേന്ദ്രാവിളങ്ങുന്നു<br>ചന്ദ്രനെപ്പോലെ നിന്മുഖം. |
| അനന്വയം | തന്നോടു സമമായ് താൻതാ-<br>നെന്നു ചൊന്നലനന്വയം<br>ഇന്ദുവിന്ദുവിനോടൊപ്പം<br>സുന്ദരാകൃതി ഭാസുരൻ. |
| വ്യതിരേകം | വിശേഷം വ്യതിരേകാഖ്യം<br>വർണ്ണ്യാവർണ്യങ്ങൾതങ്ങളിൽ<br>കുന്നുപോലുന്നതൻ ഭൂപ-<br>നെന്നാൽ പ്രകൃതികോമളൻ. |
| ദീപകം | അനേകമേകധർമ്മത്തി-<br>ലന്വയിപ്പതു ദീപകം<br>മദം കൊണ്ടാനശോഭിക്കു-<br>മൌദാര്യംകൊണ്ടു ഭൂപതി |
| കാവ്യലിംഗം | ഹേതുവാക്യപദാർത്ഥങ്ങ-<br>ളാവുകിൽ കാവ്യലിംഗമാം<br>കന്ദർപ്പാ നീ കളിക്കേണ്ട<br>മന്ദ ഞാൻ ശിവഭക്തനാം |

ശബ്ദാലങ്കാരം

അനുപ്രാസം : അനുപ്രാസം വ്യഞ്ജനത്തെ-
യാവർത്തിക്കിലിടയ്ക്കിടെ.

[ഒരേ വ്യഞ്ജനവർണ്ണത്തെ അടുത്തടുത്താവർത്തിക്കുന്നത് അനുപ്രാസം സ്വരങ്ങളെ ആവർത്തിക്കുന്നതാകട്ടെ അലങ്കാരമാകുന്നില്ല. എന്നു മാത്രമല്ല പ്രത്യുത ദോഷമായും കൂടി ഗണിക്കപ്പെടും]

## संस्कृतसाहित्यस्य मुख्याः षट् पद्धतयः

| सिद्धान्तः | प्रवर्तकः | मुख्यग्रन्थः |
|---|---|---|
| रसपद्धतिः | भरतमुनिः | नाट्यशास्त्रम् |
| अलङ्कारपद्धतिः | भामहः | काव्यालङ्कारः |
| रीतिपद्धतिः | वामनः | काव्यालङ्कारसूत्रवृत्तिः |
| ध्वनिपद्धतिः | आनन्दवर्धनः | ध्वन्यालोकः |
| वक्रोक्तिपद्धतिः | कुन्तकः | वक्रोक्तिजीवितम् |
| औचित्यपद्धतिः | क्षेमेन्द्रः | औचित्यविचारचर्चा |

लावण्यलसिता या सा
छन्दोयुक्ता हि भारती।

# 10 वाणी रूपवती



**पाठप्रवेशः**

**अपि माषं मषं कुर्यात्**
**छन्दोभङ्गं न कारयेत् ।**

पद्यांशमिमं पूर्वं श्रुतवन्तः वा ? छन्दो नाम किम् ? वृत्तच्छन्दसोः को भेदः?

## आमुखम्

छन्दो नाम अक्षरसंख्याक्रमः । छन्दोभेदेन वृत्तभेदोऽपि जायते। उक्ता अनुक्ता गायत्री अनुष्टुप् त्रिष्टुप् जगतीप्रभृतीनि विविधानि छन्दांसि सन्ति । एकस्मिन् छन्दसि विविधानि वृत्तानि गणानुसारं भवन्ति ।

**पद्यनिर्माणमापकं वृत्तमित्यभिधीयते ।** पद्यं वृत्तनिबद्धं भवति । वृत्तनिर्णयः छन्दांसि अनुसृत्यैव भवति । मात्रावृत्तं वर्णवृत्तं चेति वृत्तानां द्वैविध्यम् । आर्या, गीतिः इत्यादीनि मात्रावृत्तानि । अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, वंशस्थम् इत्यादीनि वर्णवृत्तानि । मात्रा नाम उच्चारणकालः। अतः मात्रावृत्ते मात्राणां संख्याः एव गणयति । वर्णवृत्तेषु लघुगुरुभेदं तथा एकैकपादे विद्यमानाक्षरसंख्यां च आश्रित्य वर्णवृत्ते वैविध्यं भवति । वर्णवृत्तान्यपि समवृत्तम् अर्धसमवृत्तं विषमवृत्तं चेति त्रिधा विभक्तानि । प्रतिपादं वर्णसंख्या तुल्या चेत् समवृत्तम् । प्रथमे, तृतीये तथा द्वितीये, चतुर्थे च वर्णसंख्या भिद्यते चेत् अर्धसमवृत्तम् । चतुर्षु अपि पादेषु अक्षरसंख्या भिन्ना चेत् विषमवृत्तम् । एकाक्षरात् आरभ्य षड्विंशतिं यावत् दीर्घवृत्तानि च । अक्षरसंख्या षड्विंशतितः अधिका चेत् तत् पद्यं दण्डकम् इति उच्यते । अक्षरसंख्यानुसारं छन्दसां भेदः, तदनुसारं वृत्तभेदोऽपि जायते ।

## लघुगुरुभेदः

**ह्रस्वो लघुः** - अक्षराणाम् उच्चारणकालानुसारं लघु-गुरु-भेदः विद्यते। एकमात्रात्मकः वर्णः लघुः। उदा – अ इ उ ऋ क च ट इत्यादि।

**दीर्घो गुरुः** – द्विमात्रात्मकः वर्णः गुरुः। अनुस्वारसहितः विसर्गसहितः संयुक्ताक्षरात् पूर्वतनश्च वर्णः ह्रस्वः चेदपि दीर्घो भवेत् तथा पदान्तस्थो लघुवर्णश्च यथायोग्यं गुरु स्यात्। उदा- वनं, मानवः, शक्तः। उच्चारणाय एकमात्राधिकः कालः अपेक्ष्यते चेत् गुरुः (दीर्घः) भवति। उदा – आ ई ऊ ॠ ऐ ओ औ का की कू इत्यादि।

## गणविवेकः

लघुगुरुविन्यासभेदात् अष्टगणाः सन्ति।

आदिमध्यावसानेषु
यरता यान्ति लाघवम्।
भजसा गौरवं यान्ति
मनौ तु गुरुलाघवम्॥

गुरुः (-) चिह्नेन लघुः (U) चिह्नेन च सूच्यते।

गणाः यथा -

| | | |
|---|---|---|
| यगणः | - | (मनुष्यः) आदिलघुः |
| रगणः | - | (भारती) मध्यलघुः |
| तगणः | - | (नामानि) अन्त्यलघुः |
| भगणः | - | (कारय) आदिगुरुः |
| जगणः | - | (नमामि) मध्यगुरुः |
| सगणः | - | (मधुरं) अन्त्यगुरुः |
| मगणः | - | (सन्तोषः) सर्वगुरुः |
| नगणः | - | (वदति) सर्वलघुः |

पाठेऽस्मिन् वर्णवृत्तेषु **अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, तोटकम्, रथोद्धता, वंशस्थम्,** अर्धसमवृत्तेषु **वियोगिनी** मात्रावृत्तेषु **आर्या** च पठ्यन्ते॥

## यतिविवेकः

'विश्रमस्थानं यतिरित्यभिधीयते'। वृत्तलक्षणे यत्र जिह्वाविरामः कल्पितः तत्र यतिः भवति। विच्छेदः, विरामः इत्यादि पदैः यतिः सूच्यते।

## अनुष्टुप् (श्लोकः)

**लक्षणम्**

श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

सर्वेषु पादेषु पञ्चमवर्णः लघुः द्वितीयचतुर्थयोः पादयोः सप्तमवर्णोऽपि लघुः एव। सर्वेषु पादेषु षष्ठः वर्णः गुरुः च भवति। प्रथमे तृतीये च पादे सप्तमं दीर्घं च स्यात्। एवं प्रतिपादमष्टौ वर्णाः।

**उदा-**

एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि
गणयामास पार्वती ॥

उदाहरणे प्रथमपादे **एवं वादिनि देवर्षौ** इत्यत्र पञ्चमषष्ठवर्णौ लघुगुरू भवतः। द्वितीयचतुर्थपादयोः सप्तमवर्णोऽपि लघुः भवति। प्रथमतृतीयपादयोः सप्तमो वर्णः गुरुश्च भवति।

## इन्द्रवज्रा - (त्रिष्टुब्छन्दः)

**लक्षणम्**

स्यादिन्द्रवज्रा यदि तौ जगौ गः।

यदि तौ (तगणद्वयं) जगौ जगणः गुरुद्वयं च क्रमशः स्यात् तर्हि इन्द्रवज्रा नाम वृत्तम्। पादान्ते यतिः।

**उदा -**

त त ज गु गु
- - U - - U U - U - -
नागेन्द्र|हस्तास्त्व|चिकर्क|शत्वा -
देकान्तशैत्यात् कदलीविशेषाः।
लब्ध्वापि लोके परिणाहिरूपं
जातास्तदूर्वोरुपमानबाह्याः ॥

अत्र तगणः- तगणः – जगणः – गुरुद्वयम् इति क्रमशः भवन्ति इत्यतः इन्द्रवज्रा नाम वृत्तम्, पादान्ते यतिः च ॥

## उपेन्द्रवज्रा

### लक्षणम्

उपेन्द्रवज्रा जतजास्ततो गौ।

जतजाः (जगणतगणजगणाः) ततः गौ (गुरुद्वयं) च यदि भवेयुः तर्हि उपेन्द्रवज्रा स्यात्। पादान्ते यतिः च।

### उदा -

ज त ज गु गु
U - U - - U U - U - -
त्वमेव | माता च | पिता त्व | मेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥

अस्मिन् श्लोके प्रतिपादं यथाक्रमं जगण-तगण-जगणाः गुरुद्वयं च भवति। अतः उपेन्द्रवज्रा नाम वृत्तम्। पादान्ते यतिः च। पदान्तस्थं लघु गुरुत्वेन परिगण्यते।

## रथोद्धता

### लक्षणम्

रान्नराविह रथोद्धता लगौ।

प्रतिपादं रगणात् परं नगणरगणौ लघुः गुरुः चेति एकादशवर्णाः यथाक्रमं भवन्ति। पादान्ते यतिश्च। एवं चेत् रथोद्धता नाम वृत्तं भवति।

### उदा-

र न र ल गु
- U - U U U - U - U -
एकदा | दधिवि | माथका | रिणीं
मातरं समुपसेदिवान् भवान्।
स्तन्यलोलुपतया निवारय-
न्नङ्कमेत्य पपिवान् पयोधरौ ॥

अस्मिन् श्लोके प्रतिपादं रगणः, नगणः रगणः, लघुः, गुरुः चेति एकादशवर्णाः यथाक्रमं भवन्ति। पादान्ते यतिश्च। अतः रथोद्धता नाम वृत्तं भवति।

## तोटकम् - (जगतीच्छन्दः)

**लक्षणम्**

इह तोटकमम्बुधिसैः कथितम्।
(पाठान्तरम्- वद तोटकमम्बुधिसैः प्रथितम्)

यत्र चतुर्ष्वपि पादेषु चत्वारो सगणाः सन्ति, तत्र तोटकं नाम वृत्तं भवति।

**उदा-**

स स स स

UU- UU- UU- UU-

भुवन|त्रयभा|रभृतो| भवतो|
गुरुभारविकम्पिविजृम्भिजला।
परिमज्जयति स्म धनुश्शतकं
तटिनी झटितिस्फुटघोषवती।।

अत्र प्रतिपादं चत्वारः सगणाः सन्ति। इत्यतः तोटकं नाम वृत्तम्। द्वादशाक्षरात्मकमिदं वृत्तम्। पादान्ते यतिः च।

## वंशस्थम्

**लक्षणम्**

जतौ तु वंशस्थमुदीरितं जरौ।

श्लोके प्रतिपादं जगणः, तगणः, जगणः, रगणश्च यथाक्रमं भवन्ति चेत् वंशस्थं नाम वृत्तं भवति।

**उदा-**

ज त ज र

U-U --U U-U-U-

अधीति| बोधाच|रणप्र|चारणै -
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान् कुतस्स्वयं
न वेद्मि विद्यासु चतुर्दशस्वयम्।।

अस्मिन् श्लोके प्रतिपादं यथाक्रमं जगण-तगण-जगण-रगणाः पादान्ते यतिः च। अतः वंशस्थं नाम वृत्तम्।

## आर्या (मात्रावृत्तम्)

### लक्षणम्

यस्याः प्रथमे पादे द्वादशमात्राः तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥

### उदा -

U U - U -   U  - -
करपल्लवः स तस्याः - (12)

UU-U  U -  U - U - - -
सहसैव जडो जडात्परिभ्रष्टः । (18)

U U - U -   U  - -
परिकम्पिनः प्रकम्पी - (12)

U - U -   - U -    - -
करान्मम स्विद्यतः स्विद्यन् ॥ (15)

अस्मिन् पद्ये प्रथमे तृतीये च पादयोः द्वादशमात्राः, द्वितीये पादे अष्टादश मात्राः, चतुर्थे पादे पञ्चदशमात्राश्च भवन्ति। अतः आर्या नाम वृत्तम् ।

## वियोगिनी- (अर्धसमवृत्तम् )

### लक्षणम्

विषमे ससजाः गुरुः समे।
सभरालोऽथ गुरुर्वियोगिनी॥

प्रथमतृतीयपादयोः सगण-सगण-जगणाः गुरुः चेति दशवर्णाः, द्वितीयचतुर्थपादयोः सगण-भगण-रगणाः लघुः गुरुः चेति एकादशवर्णाः भवन्ति चेत् वियोगिनी नाम वृत्तं भवति । अस्य वृत्तस्य सुन्दरी इति नामान्तरं वर्तते।

### उदा-

स      स      ज    गु
U  U -   U  U -   U - U   -
विशिखा| निशिता| विरम्य|तां

स      भ      र     ल गु
U U - -   U  U   - U   - U -
क्षतमे|यात् स्तिमि|तं न मे| मनः।

पुरतो भ्रम लोकचक्र मां
त्यज सीतामिह तां हतामहो ॥

अस्मिन् पद्ये प्रथमतृतीयपादयोः सगण-सगण-जगणाः गुरुः चेति दशवर्णाः, द्वितीयचतुर्थयोः सगण-भगण-रगणाः लघुः गुरुः चेति एकादशवर्णाः च भवन्ति अतः वियोगिनी नाम वृत्तम्। पादान्ते यतिः च।

## पठनप्रवर्तनानि

**त्र्यक्षरपदानि सञ्चिनोतु। तानि कस्मिन् गणे अन्तर्भवन्ति इति निश्चिनोतु।**

**श्रद्धेयाः आंशाः -**

पदानां चयनम्
गणविवेचनम्
गणनिर्णयः।

**चर्चां कृत्वा पाठभागे विद्यमानानां श्लोकानां वृत्तं निर्णयतु।**

**श्रद्धेयाः आंशाः -**

श्लोकानां चयनम्
गणनिर्णयः
लक्षणलेखनम्।

**पाठभागत् कमपि श्लोकं चित्त्वा वृत्तं निश्चिनोतु।**

**श्रद्धेयाः आंशाः -**

श्लोकचयनम्
गणविवेचनम्
लक्षणलेखनम्।

**अधः प्रदत्तेषु कस्य पद्यस्य आलापनभेदः इति विविच्य लिखतु।**

1) गतं तिरश्चीनमनूरुसारथैः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥

2) उद्यमेन हि सिद्ध्यन्ति
कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य
प्रविशन्ति मुखे मृगाः ॥

3) विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा।
कपालि वा स्यादथवेन्दुशेखरो
न विश्वमूर्तेरवधार्यते वपुः ॥

**अधः प्रदत्तानि वृत्तलक्षणानि यथोचितं योजयतु।**

| | |
|---|---|
| इन्द्रवजा | - ज त ज र |
| उपेन्द्रवज्रा | - स स स स |
| तोटकम् | - ज त ज गु गु |
| रथोद्धता | - त त ज गु गु |
| वंशस्थम् | - र न र ल गु |

**अधः प्रदत्तानां श्लोकानां गणनिर्णयं कृत्वा वृत्तनिर्णयं करोतु।**

1) आमेखलं सञ्चरतां घनानां
छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥

2) उवाच छात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥

3) सामिपीतरसभङ्गसङ्गत -
क्रोधभारपरिभूतचेतसा।
मन्थदण्डमुपगृह्य पाटितं
हन्त ! देव दधिभाजनं त्वया ॥

4) जिता जगत्येष भवभ्रमस्तैः
गुरूदितं ये गिरिशं स्मरन्ति।
उपास्यमानं कमलासनाद्यैः
उपेन्द्रवज्रायुधवारिनाथैः ॥

# Notes

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.